15. **जयदेवः** प्रायः १००० ई.पू. एकः भारतीयः गणितज्ञः आसीत् यः चक्रीयपद्धतिं (चक्रावलविधिम्) अग्रे विकसितवान्। यत् हरमन हॅन्केल् इत्यनेन "लैग्रान्ज् (१८ शताब्द्याः) पूर्वं सङ्ख्यासिद्धान्ते यत् सर्वोत्तमम् आसीत् तत् " इति उक्तम्। कॉम्बिनेटरिक्स शास्त्रे अपि महत्त्वपूर्णं योगदानं दत्तवान्। जयदेवस्य कृतयः नष्टाः सन्ति। उदय-दिवाकरसुन्दरी (प्रायः १०७३), २० श्लोकः - उद्धरणात् एव अयं ज्ञायते। यो भास्करप्रथमस्य लघु-भास्करीयस्य टीका अस्ति। अनेन ज्ञायते यत् जयदेवः १०७३ तः पूर्वं कदाचित् सम्भवतः १००० ई. आसीत् इति।

16. **पृथूदकः**-अयं प्रसिद्धः दैवज्ञः आसीत्। ८६० तमे वर्षे प्रायः ब्रह्मस्फुटसिद्धान्तस्य वासनाभाष्यम् इति टीकां रचितवान्। काये इत्यस्य मते अयं टोलेमी इत्यस्य प्रमेयम् अन्विष्टवान्।

17. **हलायुधः** भारते हलायुधेन मेरुप्रस्तार १२०० ई. मध्ये आविष्कृतः।

18. **आर्यभटः**२, 920-1000, -डॉ.सिंहदत्तयोः मतं (History of Hindu Mathematics, भाग२, पृष्ठं ८९) अस्ति यत् एतत् ९५० ई. इत्यस्य समीपे आसीत्, यत् शकलः ८७२ अस्ति। महासिद्धान्तः अस्य कृतिः भवति। आर्यभटद्वितीयः ब्रह्मगुप्तम् अनुवर्तते, यतो ब्रह्मगुप्तेन आर्यभटेन खण्डितानि तथ्यानि आर्यभटीयायां मिलति। न तु महासिद्धान्तात्। महासिद्धान्तात् प्रतीयते यत् ब्रह्मगुप्तेन आर्यभट्टस्य यानि तथ्यानि खण्डितानि आसन्, तानि

[1] *O'Connor, John J.;* Robertson, Edmund F., "Govindasvami", MacTutor History of Mathematics Archive, University of St Andrews

[2] William E. Burns, ed. (2020). Science and Technology in World History. Vol. 1. ABC-CLIO. p. 283. ISBN 9781440871177.

महासिद्धान्ते संशोधितानि सन्ति इति। ब्रह्मगुप्तेन लल्लेन च अयनचलनविषये काऽपि चर्चा न कृता, परन्तु आर्यभट्टद्वितीयेन तस्मिन् विषये बहु चिन्तनं कृतम् अस्ति।

19. **वटेश्वरः**अस्य जन्म ८८० तमे शताब्दे अभवत् १० शताब्दे भारतीयः कश्मीरप्रदेशस्थः गणितज्ञः आसीत्। येन २४ वर्षे वटेश्वर-सिद्धान्तनामकं पुस्तकं रचयित्वा अनेकानि त्रिकोणमितीयपरिचयानि प्रस्तुतानि। वटेश्वरसिद्धान्तः खगोलशास्त्रं प्रयुक्तगणितं च सम्बद्धः ग्रन्थः अस्ति, यस्य रचना ९०४ तमे वर्षे अभवत्।

20. **श्रीपतिः,** 1019-1066 - चिरप्रसिद्धस्यापि लुप्तप्रायस्य सुतरां कुत्राप्यमुद्रितस्य श्रीपतिप्रणीतस्य सिद्धान्तशेखरस्य प्रथमप्रकाशनावसरे प्रकाशयितुमत्र यत्किञ्चिदिदमावेदनं विद्वद्वरेषु नितरामावश्यकम्। इदं विदितमेव मनीषिणां ज्यौतिष्काणां च यत् प्रकृतोऽयं सम्बसराचार्यश्रीपतिप्रणीतः सिद्धान्तशेखरो नाम ज्यौतिषसिद्धान्तग्रन्थः प्राचीनैश्चिरीकृतोऽपि साम्प्रतमनेकैर्ग्रन्थरत्नैः साकं लुप्तप्रायो बभूव। बहुभिरयं श्रीपतिभट्टः इति कथ्यते। अयं भारतवर्षे त्रिस्कन्धज्यौतिषशास्त्रेषु स्वसमयेऽद्वितीयः पण्डित आसीत्। अहो एतादृशस्य ज्यौतिषशास्त्रविदो विदुषः पाटीगणितम्, बीजगणितम्, सिद्धान्तशेखरः आदिकं ग्रन्थजातं विनष्टं, न कुत्राप्युपलभ्यते।" इति।

21. **भास्करद्वितीयः -** भास्कराचार्यः अथवा भास्करद्वितीयः (१११४ – ११८५) अयं प्रसिद्धः गणितज्ञः ज्योतिषी च आसीत्। तेन रचितः मुख्यग्रन्थः सिद्धान्तशिरोमणिः वर्तते। अस्मिन् ग्रन्थे लीलावती, बीजगणितम्, ग्रहगणितं, गोलाध्यायः इति चत्वारः भागाः सन्ति। आधुनिकयुगे पृथिव्याः गुरुत्वाकर्षणशक्तेः (पदार्थानाम् आकर्षणस्य शक्तिः) आविष्कारस्य श्रेयः न्यूटनस्य भवति। परन्तु अत्यल्पाः जनाः जानन्ति यत् भास्कराचार्यः न्यूटनात् बहुशताब्दपूर्वमेव गुरुत्वाकर्षणस्य रहस्यं प्रकाशितवान् आसीत्। भास्कराचार्येण पृथिव्याः गुरुत्वाकर्षणविषये 'सिद्धान्तशिरोमणिः' इत्यस्मिन् ग्रन्थे लिखितवान् यत् 'पृथिवी आकाशद्रव्याणि स्वं प्रति विशेषशक्त्या कर्षति' इति। अयं करणकौतुहलम् इति अन्यत् पुस्तकमपि रचितवान् आसीत्। अयं स्वसमयस्य प्रसिद्धः गणितज्ञः आसीत्।अधोलिखितेषु श्लोकानुसारं सह्याद्रिपर्वतेषु स्थिते विज्जदाविद् इति ग्रामे भास्कराचार्यस्य जन्म अभवत्।

आसीत् सह्यकुलाचलश्रितपुरे त्रैविद्यविद्वज्जने।
नाना सज्जनधाम्नि विज्जलविडे शाण्डिल्यगोत्रो द्विज:॥
श्रौतस्मार्तविचारसारचतुरो नि:शेषविद्यानिधि:।
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणि:॥ (गोलाध्याये प्रश्नाध्यायः, *श्लोक ६१)*

परन्तु विद्वांसः अस्य विज्जलविड्ग्रामस्य प्रामाणिकं भौगोलिकं स्थानं निर्धारयितुं न शक्तवन्तः। डॉ. भौ दाजी (१८२२-१८७४ ई.) इत्यनेन महाराष्ट्रस्य चालिसगांवतः प्रायः १६ कि.मी दूरे स्थिते पाटनग्रामे एकस्मिन् मन्दिरे एकः शिलालेखः आविष्कृतः। शिलालेखानुसारं भास्कराचार्यस्य पितुः नाम महेश्वरभट्टः आसीत्, तस्मात् अयं गणितं, ज्योतिषं, वेदः, काव्यं, व्याकरणम् इत्यादीनां शिक्षां प्राप्तवान्।भास्कराचार्यः गोलाध्यायस्य प्रश्ना ध्यायस्य ५८ श्लोके लिखति - रसगुणपूर्णमही समशकनृपसमयेऽभवन्ममोत्पत्तिः। रसगुणवर्षेण मया सिद्धान्तशिरोमणी रचितः॥

शकसंवत् १०३६ तमे वर्षे षड्विंशत् वर्षे सिद्धान्तशिरोमणिम् रचयामास। अतः उपर्युक्तश्लोकात् स्पष्टं भवति यत् भास्कराचार्यः शकसंवत् १०३६ अर्थात् ई. ११४४ तमे वर्षे जातः तथा च अयं शकसंवत् १०७२ अर्थात् ई. ११५० तमे वर्षे ३६ वर्षे लीलावतीम् रचयामास। करण-कुतुहलस्य रचना ६९ वर्षे ११८३ ई. अकरोत्। १९७९ तमे वर्षे जूनमासस्य ७ दिनाङ्के प्रक्षेपितस्य उपग्रहस्य भास्कर - १, १९८१ तमस्य वर्षस्य नवम्बर्-मासस्य २० दिनाङ्के प्रक्षेपितस्य प्रथमस्य द्वितीयस्य च उपग्रहस्य भास्कर - २ इति नामकरणं भारतेन प्राचीनवैज्ञानिकपरम्परायाः अग्रे प्रसारयितुम् गणितज्ञस्य भास्कराचार्यस्य नामकरणेन कृतम्। ११५० तमे वर्षे अयं सिद्धान्तशिरोमणिः इति पुस्तकं संस्कृतश्लोकेषु चतुर्विभागेषु रचितवान्, ते यथा -

- गणिताध्यायः / लीलावती।
- बीजगणिताध्यायः।
- ग्रहगणिताध्यायः
- गोलाध्यायः।

एतेषु प्रथमद्वयं स्वतन्त्रग्रन्थम्, अन्तिमद्वयं "***सिद्धान्तशिरोमणिः***" इति नाम्ना प्रसिद्धम्।एतदतिरिक्तं करणकुतूहलं वासनाभाष्यं च (सिद्धान्तशिरोमणिभाष्यम्) भास्करविवाहपाटलं च इति लघुज्योतिषग्रन्थद्वयं तेन लिखितम् अस्ति। भारतीयज्योतिषशास्त्रं सम्यक्तया सिद्धान्तशिरोमणितः एव ज्ञातुं शक्यते।

बीजगणिते भास्करः ब्रह्मगुप्तं गुरुं मन्यते स्म।अयं बीजगणितीयसमीकरणानां समाधानार्थं चक्रवालस्य पद्धतिम् अन्विष्टवान्। षड्शताब्दपश्चात् गेलोइस्, यूलर, लैग्रान्ज् इत्यादयः यूरोपीयगणितज्ञाः एतां पद्धतिं पुनः आविष्कृत्य 'विलोमचक्रीयम्'(इनवर्स साइक्लिक')इति जानान्ति स्म। सर्वप्रथमम्अयं गणितीयक्रियाणां प्रयोगम् अपरिमेयराशीनां प्रयोगं कृतवान्। गणितशास्त्रे एतस्य उत्तमं योगदानं चक्रीयपद्धत्या आविष्कृतानां अनिर्धारितरेखीयद्विघातसमीकरणानां सामान्यसमाधानम् अस्ति। भास्कराचार्यस्य पुस्तकस्य अन्यासु नवीनतासु त्रिप्रश्नाधिकारस्य नवीनाः प्रथाः, उदयन्तकालस्य स्पष्टव्याख्या इत्यादयः सन्ति। भास्कराचार्यस्य अपि अनन्तस्य, गणितस्य केषाञ्चन सूत्राणां च ज्ञानम् आसीत्। एतान् अतिरिच्य सः कस्यचित् कार्यस्य भेदस्य नामकरणं "क्षणिकगतिः" इति कृत्वा तत् सिद्धं कृतवान्।

d (ज्या q) = (कोटिज्या q) . dq बिम्बार्धस्य कोटिज्या गुणास्त्रिज्याहारः फलं दोर्ज्यायोरन्तरम्।

त्रिकोणमिति -गोलाध्याये ज्योत्पत्ति भागे निम्नलिखितश्लोकेषु sin(अ+ख) = sin अ cos ख + cos अ sin ख इत्यस्य वर्णनम् अस्ति।

चपयोरिष्टयोर्दोर्ज्ये मिथक: कोटिज्यकहते।
त्रिज्य भक्त तयोरैक्यं स्याचपैक्यस्य दोर्ज्यक॥ २१ ॥[1]
चपन्तरस्य जीव स्यात तयोरन्तरसम्मिता॥ २१ १ / २॥[2]

[1] Addition and Subtraction Theorems for the Sine and Cosine in Medieval India Archived 2018-05-03 at the Wayback Machine (राधा चरण गुप्त ; BIT राँची)

[2] Mathematical Achievements of Pre-modern Indian Mathematicians ; पृष्ट ५३१ Archived 2018-05-03 at the Wayback Machine (By T. K. Puttaswamy)

कैलकुल्स - भास्कराचार्यः न्यूटन-लाबनीजयोः पञ्चषड्ढतवर्षपूर्वं गणितस्य महत्त्वपूर्णं कार्यं कृतवान् आसीत्। चलन-कलन (differential calculus) खगोल - ब्रह्मगुप्तस्य खगोलशास्त्रस्य प्रतिरूपं (७ शताब्दी) अनुसृत्य भास्कराचार्यः अनेकासां खगोलीयमात्राणां निर्दुष्टं मूल्यं दत्तवान्। यथा - पृथिव्या सूर्यं परितः परिभ्रमितुं यः समयः गृहीतः सः ३६५.२५८८ दिवसाः इति कथितवान्, यत् आधुनिककाले ३६५.२५६३६ दिवसाः इति मन्यते। भास्करा-चार्यस्य सिद्धान्तशिरोमणिः द्वयोः भागयोः विभक्तः इति गणयितुं शक्यते – प्रथमः भागः सैद्धान्तिकखगोलशास्त्रस्य विषये अस्ति, द्वितीयः भागः गोले विषये अस्ति (द्रष्टव्यम् गोलाध्यायम्)।

22. **सङ्गमग्रामस्य माधवः** (१३५० ई. – १४२५ ई.)तमे शताब्दे केरलस्य प्रसिद्धः गणितज्ञः - खगोलशास्त्रज्ञः आसीत्। अयं भारतस्य केरलराज्यस्य कोचीनमण्डलस्य समीपे एरन्नालककुलम् इति नगरस्य निवासी आसीत्।सः केरल-खगोलशास्त्र-गणित-विद्यायाःसंस्थापकः इति मन्यते।अयं सर्वादौ अनन्तश्रेणीनां सन्निकर्षं विकसितवान्, यत् "सीमापरिवर्तनम् अनन्ततां प्रति नेतुं प्राचीनगणितस्य अनन्तपद्धत्याः परं निर्णायकं सोपानम्" इति उच्यते।[1]एतस्य आविष्कारेण अधुना गणितीयविश्लेषणम् (मैथेमैटिकल एनालिसि) इति प्रसिद्धः शाखा अभवत्।माधवः अनन्तश्रृङ्खला, कलन (कैलकुलस), त्रिकोणमिति, ज्यामिति, बीजगणितम् इत्यादीनाम् अध्ययने माधव: विशिष्टं योगदानं दत्तवान्। सः मध्ययुगीनकालस्य महान् गणितज्ञ-खगोलशास्त्रज्ञः आसीत्।माधवस्य उत्तरवर्ती उल्लेखः परवर्तीगणितज्ञानाम् कृतिषु विशेषतः नीलकण्ठ सोमयाजी इत्यस्य तन्त्रसंग्रहे (प्राय: १५०० ई. स.) अनेक sinθ, arctanθ च समाविष्टानाम् अनन्तश्रृङ्खलानां विस्ताररूपेण उल्लेखितः अस्ति षोडशशताब्द्याः महाज्ञानायनग्रन्थे π इत्यस्य अनेकासाम् श्रृङ्खलाव्युत्पत्तीनां स्रोतः इति माधवेन उद्धृतम् अस्ति। मलयालमभाषायां लिखिते ज्येष्ठदेवस्य युक्तिभाषायां (साधरणम् १५३०[५]) एताः श्रृङ्खलाः १/(१+x २) इत्यादीनां बहुपदानां कृते टेलरश्रृङ्खलायाः विस्ताररूपेण प्रमाणरूपेण प्रस्तुताः सन्ति, यत्र x = tan θइत्यादयः प्रस्तुताः सन्ति।सम्भवतः ज्येष्ठदेवस्य शिष्येण शंकरवारियरेन रचिता युक्ति-दीपिका (तन्त्रसङ्ग्रहभाष्यम् इति अपि ज्ञायते), sin θ, cos θ, arctan θ च कृते श्रृङ्खलाविस्तारस्य प्रारूपं प्रस्तौति। क्षेत्रस्य त्रिज्यायाः दीर्घतायाः च केचन उत्पादाः अपि सन्ति, येषां अधिका: संस्करणाः युक्तिभाषायाम् अपि दृश्यन्ते।

$$r\theta = \frac{r\sin\theta}{\cos\theta} - (1/3)\,r\,\frac{(\sin\theta)^3}{(\cos\theta)^3} + (1/5)\,r\,\frac{(\sin\theta)^5}{(\cos\theta)^5} - (1/7)\,r\,\frac{(\sin\theta)^7}{(\cos\theta)^7} + \ldots$$

नीलकण्ठसोमयाजीपरमेश्वरस्य पुत्रस्य दामोदरस्य (साधारणतया १४००–१५००ईस्वी) शिष्यः आसीत्। ज्येष्ठदेवः नीलकण्ठस्य शिष्यः आसीत्। अच्युत पिषारडीयःत्रिक्कन्तियूरतः आसीत्, एतस्य उल्लेखः ज्येष्ठदेवस्य शिष्यः इति वर्तते।वैय्याकरणज्ञः मेल्पथुरनारायणभट्टथिरी अच्युतस्य शिष्यःआसीत्।एवम् श्रेष्ठगणितसम्प्रदायः अद्यापि प्रवर्तते। अस्य अध्ययनम् अध्यापनम् निरन्तरतया प्रवर्तेत इति आशासे।

[1] C T Rajagopal and M S Rangachari (1978). "On an untapped source of medieval Keralese Mathematics". *Archive for History of Exact Sciences*. 18 (2): 89–102

23. **वटषेरी परमेश्वरनम्बूदिरी** (१३८० – १४६० ई.) केरलगणितविद्यायाः अभ्यासकः महान् गणितज्ञः खगोलशास्त्रज्ञः च आसीत्।

- भट्टदीपिका - आर्यभटीयस्य टीका।
- कर्मदीपिका – महाभास्करीयटीका।
- परमेश्वरी – लघुभास्करिया टीका।
- विवरणम् – सूर्यसिद्धान्तलीलावतीभाष्यम्।
- दिग्गणितम् - दृष्टिव्यवस्थायाः वर्णनम् (१४३१ तमे वर्षे रचितम्)।
- गोलदीपिका – गोलाकारज्यामितिः खगोलशास्त्रं च (१४४३ तमे वर्षे रचितम्)।
- वाक्यकरणम् - अनेकासां खगोलीयसारणीनां गणनाविधयः दत्ताः सन्ति।
- सिद्धान्तदीपिका - गोविन्दस्वामिनः महाभास्करीभाष्यटीका।
- ग्रहणमण्डनम् - ग्रहणस्य गणना (१५ जुलै १४११)।
- ग्रहव्याख्यादिपिका - ग्रहणसिद्धान्तस्य तर्कसङ्गतव्याख्य

परमेश्वरः विश्वस्य प्रथमः गणितज्ञः अस्ति यः प्रथमवारं एतस्य वृत्तस्य त्रिज्याम् अवदत् यस्य अन्तः चक्रीयचतुर्भुजस्य पार्श्वाः दत्ताः सन्ति।

$$R=\sqrt{\frac{(ab+cd)(ac+bd)(ad+bc)}{(a+b+c-d)(b+c+d-a)(c+d+a-b)(d+a+b-c)}}.$$

एतदेव सूत्रं ल्हुइलियर् इत्यनेन ३५० वर्षाणाम् अनन्तरं १७८२ तमे वर्षे प्रकाशितम्।

24. **नीलकण्ठसोमयाजि**, 1444तः-1545 पर्यन्तम् आसीत्। अस्य कृतयः - तन्त्रसंग्रह (१५०१), आर्यभटीय-भाष्य, ग्रहपरीक्षाक्रमः, गोलसारः, सिद्धान्तदर्पणम् चन्द्रछायागणितम्, सिद्धान्तदर्पणव्याख्या, चन्द्रछायागणितव्याख्या, सुन्दराजा-प्रश्नोत्तर, ग्रहणादि-ग्रन्थः, ज्योतिर्मीमांसा च।[1]

25. **महेन्द्रसूरी (1450ईस्वी)** - महेन्द्रदयाशङ्करसूरी १४ शताब्द्याः जैन खगोलशास्त्रज्ञः आसीत्। अयं'यन्त्रराज' इतिसंस्कृतग्रन्थम् अरचयत्, यः सर्वादौ (ASTROLABE) सम्बद्धः ग्रन्थः अस्ति। अयं मदनसूरेः शिष्यः आसीत्। एतस्य पितुः नाम दयाशङ्करः मातुः नाम विमला आसीत्।

26. **शङ्करवारियर्** - (१५०० - १५६० ई.) अयं केरलीयगणितपद्धतेः अभ्यासकः आसीत्। एतस्य परिवारः आधुनातन ओट्टपालमस्य समीपे त्रिकुटवेली इत्यत्र शिवमन्दिरे कार्यरतः आसीत्। शङ्करवारियरः मुख्यतया नीलकण्ठ-सोमायाजीतः, ज्येष्ठदेवाच्च गणितस्य शिक्षां प्राप्तवन्तः। शङ्करस्य अन्ये आचार्याः नेत्रनारायणः (नीलकान्तसोमया-जिनस्य गुरुः) चित्रभानुः च आसन्। अस्य कृतयः -

- युक्तिदीपिका : काव्यरूपस्य तन्त्रसङ्ग्रहस्य टीका, युक्तिभाषायाः आधारे लिखितः।
- लघुविवृति : गद्यरूपे तन्त्रसङ्ग्रहस्य लघ्वी टीका।

[1] https://web.archive.org/web/20160910221433/https://books.google.co.in/books?id=TGYxXjZXIGwC&printsec=frontcover#v=onepage&q&f=false

- क्रियाक्रमकरी : भास्करद्वितीयस्य लीलावती दीर्घ गद्यरूपे टीका।
- १५२९ एकः खगोलशास्त्रीयटीकाग्रन्थस्य रचना अभवत्।
- १५५४ शततमे खगोलशास्त्रस्य पुस्तिकायाः रचना अभवत्।

27. **ज्येष्ठदेवः, (**1500-1610 ईस्वी) - अयं सङ्गमग्रामस्य माधवेन (१३५० – १४२५ ईस्वी) स्थापिते केरलगणितविद्यायाः अभ्यासकः आसीत्। युक्तिभाषा एतस्य प्रसिद्धः ग्रन्थः यः नीलकण्ठसोमयाजीविरचितः तन्त्रसंग्रहस्य मलयालमभाषायां टीका अस्ति। युक्तिभाषायां ज्येष्ठदेवेन तन्त्रसंग्रहे दत्तानां गणितीयवाक्यानां सम्पूर्णं प्रमाणं दत्त्वा तेषाम् औचित्यविषये लिखितम् अस्ति। युक्तिभाषायां वर्णितविषयान् विचार्य अनेके विद्वांसः *'कैलकुलस् इत्यस्य प्रथमःग्रन्थः'* इति आमनन्ति।

28. **अच्युतपिषाराडि** १५५०-१६२१ - अयं ज्येष्ठदेवस्य शिष्यः, केरलगणितपद्धतेः मुख्यगणितज्ञः च आसीत्। मेलपट्टूरनारायणभट्टतिरि नारायणीयं प्रति यत् योगदानं कृतवान् तदर्थम्अयं विशेषतया प्रसिद्धः अस्ति। कृतयः - स्फुटनिर्णयतन्त्रम्, उपरागक्रियाक्रमम् (ग्रहस्फुटगणना तथा ग्रहण आदितः सम्बन्धितः ज्योतिषग्रन्थः; १५९३ ई), करणोत्तमम् (दृग्गणितस्य ग्रन्थः), जातकाभरणम्, होरासारोच्चयम् (श्रीपतिपद्धतेः सङ्क्षेपः), होरासारोच्चयस्य परिभाषा, वेण्वारोहव्याख्या, प्रवेशकम्, छायाष्टकम् राशिगोलस्फुटानीतिः, गोलदीपिका (एकः प्रामाणिकः गणितशास्त्रः ग्रन्थः)।

29. **मुनीश्वरः** (1650) - अस्य द्वितीयं नाम 'विश्वरूप' अस्ति। रङ्गनाथः दैवज्ञस्य पुत्रः आसीत्। सूर्यसिद्धान्तविषये रङ्गनाथस्य 'सौरभाष्य' इति पुस्तकं महत्त्वम् आवहति। आचार्यः मुनीश्वरपरम्परातः ज्योतिविद्यायाः पूर्णतत्त्वज्ञः आसीत्। १६४६ तमे वर्षे मुनिश्वरः सूर्यसिद्धान्तस्य भगणानाम् आधारेण 'सिद्धान्तसार्वभौम्' इति ज्योतिषसिद्धान्तविषये पुस्तकं रचितवान्। अस्य ग्रन्थस्य भाष्यं स्वयम् 'स्वाशयप्रकाशिनी' इति नाम्ना अयं एव लिखितवान्।

कृतयः -

- लीलावत्याः टीका
- पाटीसारः - स्वतन्त्रग्रन्थः
- मारीचिः- भास्कराचार्यकृतसिद्धान्तशिरोमण्याः टीका

30. **जगन्नाथसम्राटः** - पण्डितजगन्नाथसम्राटः (१६५२-१७४४ ई) प्रसिद्धः खगोलविदः एवं गणितज्ञःआसन्। अयं आमेरस्य द्वितीयमहाराजस्य जयसिंहस्य दरबारस्य आदरणीयः वैज्ञानिकः आसीत्।एतस्य साहाय्येन एव जयपुरे अधोलिखितानि यन्त्राणि निर्मितानि अभवन्। सम्राटयन्त्रम् (लघु), नाडी-वलय-यन्त्रम्, कांति-वृत्त-यन्त्रम्, यन्त्रराजम्, दक्षिणोदक-भित्ति-यन्त्र, उन्नतांश-यन्त्र, जयप्रकाश-यन्त्रम्, सम्राट-यन्त्र (दीर्घ), षष्टांशयन्त्रम्, कपालीवलययन्त्रम्, राशिवलययन्त्रम्, चक्रयन्त्रम्, रामयन्त्रम्, दिगंशयन्त्र आदि।

कृतयः -

- रेखागणितः - यूक्लिड 'द एलिमेन्ट्स' इत्यस्य अनुवादः।

(नासिर अल-दीन अल-तुसी द्वारा 'द एलिमेंट्स' तः अरबी अनुवादतः)

- **सिद्धान्तसारकौस्तुभः** - Almagest अरबीरूपस्य अनुवादः।
- **सिद्धान्तसम्राटः** - astrolabe आदि खगोलीयन्त्राणाम् अनुवादः।
- **यन्त्रप्रकारः** - astrolabe आदि खगोलीय यंत्राणाम् अनुवादः।

31. **मेलपुतुर् नारायण भट्टथिरी** (१५५९-१६३२ ई) अयं गणितज्ञःअच्युतपिषरड्याः तृतीयः शिष्यः आसीत्। अयं गणितज्ञः व्याकरणशास्त्रज्ञः आसीत्। 'प्रक्रिया सर्वस्वम्' इति अस्य सर्वाधिकमहत्त्वपूर्णा कृतिः वर्तते। अयं ग्रन्थः सूत्रात्मकरूपेण पाणिनेः अष्टाध्यायी इत्यस्य व्याख्यां करोति। अस्य 'नारायणीयम्' इति कृतिः सर्वाधिकप्रसिद्धा वर्तते। अस्मिन् गुरुपवनपुरेशस्य (कृष्णस्य) स्तुतिःवर्तते। सम्प्रति अपि गुरुवायुर् मन्दिरे पठ्यते।

सारांशः - भारतीयगणितपरम्परा तेषां योगदानम् एकस्मिन् पत्रे वा ग्रन्थे लेखितुम् अशक्यम्। तथापि यथा पक्षी पश्यति तद्वत् स्वल्पमात्रस्य परिचयप्रदानस्य आयसो विहितः। अस्मिन् विचारे अधिकाधिकम् अध्ययनम् भवतु इति आशास्महे।

<u>सहायकग्रन्थाः</u>

1. ओझा, रायबहादुर पं. गौरीशंकर हीराचन्द, 1988, भारतीय प्राचीन लिपिमाला,मुंशीराम मनोहरलाल, नई दिल्ली।
2. झा, डॉ. नरेश (सम्पा.), 2014, याज्ञवल्क्य शिक्षा, चौखम्भा सुरभारती प्रकाशन वाराणसी।
3. पाण्डेय, पं. राजबली, 1978, भारतीय पुरालिपि, लोकभारती प्रकाशन इलाहाबाद।
4. विकीपीडिया
5. अन्तर्जालम्
6. भारतीयज्यौतिष – नेमीचन्द्रशास्त्री जी
7. भारतीयज्यौतिशशास्त्रेतिहासः - चौखम्बा संस्कृत संस्थान वाराणसी।

Author's Detail

Address: सहायक-आचार्यः
सर्कार संस्कृतकलालयः
पूर्णवेदपुरी

****

वेदस्य अपौरुषेयत्वं नित्यत्वञ्च इति विचारः

Vēdasya Apauruṣēyatvaṁ Nityatvañca Iti Vicāraḥ

Dr. Nepal Das

शोधसारः

वेदमूलकं भारतवर्षः। अस्यैव वेदस्य विषये विद्वत्सु मतभेदाः वर्तन्ते यत् वेदः अपौरुषेयं पौरुषेयं वा, किञ्च वेदः नित्यः उत अनित्यः। परम्परायां वेदस्तु नित्यः अपौरुषेयञ्च। अस्य कर्ता कोऽपि नास्ति अपि तु ऋषयः द्रष्टारः। दर्शनभेदे वेदविषये तेषां कोऽभिप्राय इत्यत्र सामान्यतया विचार्यते।

कुञ्चिशब्दाः – वेदः, अपौरुषेयं, नित्यम्, उपनिषत्, परमेश्वरः, ब्रह्म इति।

****

भारतस्य भारतीयाणां वा मूलं वेदः। वेदोक्तानां मतानां मन्त्राणां वा प्रामाण्यमद्यावधि न कोऽपि प्रत्यपादयत्। वेदस्य अपौरुषेयत्वविषये नित्यता विषये च द्विधा परम्परा लोके विद्यते। उभयोः युक्तयः मतानि वा यथोपयुक्तानि। अतः अस्मिन् विषये प्राचीनकालात् मतपार्थक्यं विद्वत्सु विद्यते।

वेदस्य अपौरुषेयत्वं वेदस्य नित्यत्वञ्च इति द्वौ विषयौ परस्परसम्बन्धयुतौ। यत् पुरुषेण सृष्टं तत्पौरुषेयं, यत् पौरुषेयं तदनित्यम्, आदिमत्वात्, उत्पत्तिमत्वाद्वा। जन्यपदार्थः रचितपदार्थः कदापि अनादि भवितुं नार्हति। अपौरुषेयमपि भवितुं नार्हति। तद्भवति अनित्यं पौरुषेयञ्च।

नैयैयिकाः वेदप्रामाण्यवादित्वेऽपि वेदस्य अपौरुषेयत्वं नित्यत्वञ्च नाङ्गीकुर्वन्ति। तेषां मते वेदाः परमपुरुषस्य रचना। स एव परमेश्वरः, तज्जन्यः वेदोऽपि पौरुषेयः, कालिदासादिविरचितः ग्रन्थवदनित्यः।

वेदस्य अपौरुषेयत्वं मीमांसकाः वेदान्तिनश्च अङ्गीकुर्वन्ति। मनुष्यः अपूर्णः, तस्य ज्ञानं परिमितं, तदर्थं तज्जन्यं रचनायां वाक्ये वा भ्रमः, प्रमादः, विप्रलिप्सा, इन्द्रियस्य च अपूर्णता इति चत्वारः दोषाः दृश्यन्ते। वेदे दोषाः न सन्ति, अतः वेदः न पुरुषनिर्मितः। सर्वज्ञस्य सर्वशक्तिमतः पूर्णस्य परमेश्वरस्य सकाशादेव तादृशस्य प्रज्ञायाः प्रकाशः सम्भवति। परमेश्वरोऽपि न वेदस्य रचयिता। सूर्यात् सूर्यप्रकाशवत् वेदः परमेश्वरात् स्वयं प्रकाशितः। बृहदारण्यकोपनिषदि उक्तः - "**अस्य महतो भूतस्य निःश्वसितं यदेतत् ऋग्वेदो यजुर्वेदः सामवेदः**" इति। निःश्वासप्रश्वासः यथा स्वाभाविकं कर्म, न चेष्टाकृतः, तथैव वेदः परमेश्वरस्य चेष्टाकृतो बुद्धिकल्पितो वा नास्ति। परमेश्वरस्य प्रज्ञानमेव वेदः। अत्र ज्ञातृज्ञानयोः अभेदस्सम्बन्धः। प्रतिकल्पे परमेश्वरो वेदं स्मरति। ब्रह्मापि वेदस्य न कर्ता अपि तु स्मर्ता।

पराशरसंहितायामुवादः - "**न कश्चित् वेदकर्तास्ति वेदस्मर्ता चतुर्मुखः**",[1] अर्थात् वेदस्य कर्ता कोऽपि नास्ति चतुर्मुखब्रह्मा वेदस्य स्मर्ता मात्रम्।

'ब्रह्माद्याः ऋषयः सर्वे स्मारका न तु कारकाः' इति। ब्रह्माद्यामन्त्रद्रष्टाऋषिपर्यन्तं सर्वे वेदस्य स्मरणकर्ता, न तु रचयिता। परमेश्वरः प्रत्येकस्मिन् कल्पे नित्यविद्यमानस्य वेदस्य ज्ञानं ब्रह्मणे प्रयच्छति। तदेव ऊचे - "**यो ब्रह्मानं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै**" इति। वेदो नित्यो वर्तमानश्च, प्रतिकल्पे ब्रह्मा वेदस्य पुनरावृत्तिं करोति। युगान्ते प्रलयकाले वेदः परब्रह्मणि अभिन्नरूपेण तिष्ठति किञ्च कल्पारम्भे ऋषयः तपस्यया वेदं अप्राप्नुवन्। उच्यते-

"युगान्ते अन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भूवा।।" इति।

अतः ऋषिः शब्दस्य अर्थः यास्काचार्येण निरुक्ते उक्तं मन्त्रद्रष्टा, न तु मन्त्रकर्ता। ऋषिशब्दस्य व्युत्पत्तिप्रसङ्गे यास्क उवादः - "**अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भू अभ्यानर्षत् तदृषयोऽभवन्**" इति। अर्थात् तपस्यारतानामृषिणां सविधे वेदः गमनमकरोत्। ऋष्-धातोः गमनार्थे अपि प्रयोगः दृश्यते। अनेन वेदवाक्येन वेदस्य उत्पत्तिराहित्यमपौरुषेयत्वं च प्रतिपाद्यते। वेदभाष्यकारः सायणाचार्यः वेदस्य अपौरुषेयत्वं स्वीकरोति। भाष्यरचनायाः प्रारम्भे श्लोकमिमं कथयति –

"यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।।" इति।

अर्थात् यस्मात् चतुर्वेदात् निखिलं जगदुत्पद्यते, चत्वारः वेदाः यस्य निश्वासस्वरूपाः, एवं च ये सर्वविद्यायाः आधारस्वरूपाः तान् महेश्वरान् अहं नेमे। वेदः महेश्वरस्य निःश्वासस्वरूपः इति वर्णयित्वा सायणाचार्यः वेदस्य अपौरुषेयत्वं प्रतिपादयति। परमेश्वरः वेदस्य आधारः न तु रचयिता। नित्यसिद्धं वेदं परमेश्वरः प्रतिकल्पे स्मरति।

परमेश्वरः वेदस्य रचयिता इति कथनेन द्वौ दोषौ आपततः। प्रथमम्, वेदस्य अनित्यत्वापत्तिः। द्वितीयम्, परमेश्वरस्य सर्वज्ञत्वे हानिः। सर्वज्ञत्वे हानिः कथमिति चेदुच्यते – यदा कस्यचित् काव्यस्य रचना क्रियते तदा श्लोकस्य प्रथमं निर्माणं यदा भवति ततः पूर्वं तत् अज्ञातमासीत्, किन्तु परमेश्वरः सर्वज्ञः, अतः कदापि कोऽपि विषयः तेषां सविधे अज्ञातः आसीत् इति वक्तुं न शक्यते। कदाचित् परमेश्वरः वेदं रचितवान् इति स्वीकारे सति सृष्टेः पूर्वं वेदः अज्ञातः आसीत् इति आपतति, यन्न युक्तम्। अतः वेदः नित्यः, तस्य रचयिता च न परमेश्वरः इति सिद्धति। कल्पभेदेऽपि तस्य वेदस्य रूपभेदो न भवति। पूर्वकल्पवत् यथायथं वेदस्य स्मरणं परस्मिन्कल्पे क्रियते।

यत्पुरुषनिर्मितं तदुत्पत्तेः प्राक् तस्य अस्तित्वं न तिष्ठति। प्रतिकल्पे वेदस्य स्मरणमिति कथितं न तु प्रथममुच्चारणम्, पूर्वकल्पस्य सजातीयोच्चारणत्वात्। अतः वेदः न पौरषेयम्। पौरुषेयरचनायाः आदिरन्तश्च विद्यते। किन्तु वेदस्य अन्तः नास्ति।

---

[1] पराशरसंहिता 1.20

वेदान्तदर्शनस्य पूर्वमीमासायाः च मतम् - पूर्वमीमांसायां वेदस्य नित्यत्वं साधयति किन्तु परमेश्वरेण वेदस्य उत्पत्तिस्थानमिति न प्रतिपादितम्। वेदान्तदर्शने ब्रह्म परमात्मा वेदस्य आधारः। ब्रह्मसूत्रे "शास्त्रयोनित्वात्"[1] इति सूत्रे ब्रह्म वेदस्य योनिः कारणमिति उक्तम्। अस्य सूत्रस्य भाष्ये भाष्यकारशङ्कराचार्येण उच्यते - **"न हीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति"**[2] इति। अर्थात् सर्वज्ञकल्पस्य वेदस्य उत्पत्तिः ब्रह्म विना अन्यत्र भवितुं नार्हति। शुक्लयजुर्वेदस्य शतपथब्राह्मणे उक्तमस्ति यत् "ब्रह्म एव प्रथममसृजत त्रयीमेव विद्याम्"[3] इति। किञ्च "**तमनुत्रयो वेदा असृजन्त**"[4] इति। वैशेषिकदर्शने वेदमीश्वरवचनत्वेन स्वीक्रियते।

वेदान्तपूर्वमीमांसा उभयत्र वेदस्य प्रामाण्यमपौरुषेयत्वञ्च प्रतिपाद्यते किन्तु वेदस्य नित्यता विषये उभयोः भेदः अस्ति। पूर्वमीमासायां शब्दस्य नित्यत्वं प्रतिष्ठितं भवति। न्यायदर्शनस्य शब्दः अनित्यः इति मतं खण्डयित्वा जैमिनिः शब्दस्य नित्यत्वं प्रमाणयति। शब्दनित्यत्वप्रतिपादिते सति वेदस्यापि नित्यत्वं प्रतिपन्नो भवति। वेदान्तमते नित्यत्वं द्विविधम् एकं कूटस्थनित्यत्वम्, अपरञ्च प्रवाहनित्यत्वम्। कूटस्थः अर्थात् सर्वदा एकरूपः निर्विकारः। वेदान्ते केवलं परब्रह्मणः कूटस्थनित्यता स्वीक्रियते। ब्रह्म भिन्नः सर्वमनित्यमिति वेदान्तसिद्धान्तः। यस्य आविर्भावः तिरोभावो वा विद्यते सः प्रवाहनित्यः। एतेषां प्रतिकल्पे उत्पत्तिः, कल्पान्ते च लयो भवति, अतः प्रवाहनित्यः। वेदस्यापि प्रलयकाले परमेश्वरे लीनो भवति, पुनः प्रतिकल्पस्यारम्भे सः परमेश्वरः वेदं स्मरति। एतदर्थं वेदस्य कूटस्थनित्यता वेदान्ते न स्वीक्रियते, अपि तु प्रवाहनित्यता स्वीक्रियते। वेदस्य प्रवाहनित्यताविषये "**अतएव च नित्यत्वम्**"[5] इति वेदान्तसूत्रे प्रतिपाद्यते। अत्र श्रुतिः - "**वाचा विरूपनित्यया**", स्मृतिश्च - "**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भूवा**" इति। पूर्वमीमासायां तु जगतः नित्यत्वं प्रतिपाद्यते, अतः प्रवाहनित्यताप्रसङ्गः नास्त्येव। वेदस्य कूटस्थनित्यता पारमार्थिकनित्यता वा पूर्वमीमांसायां स्वीक्रियते।

सांख्यदर्शनस्य मतम् - सांख्यदर्शने वेदः नित्यः इति नाङ्गीक्रियते, किन्तु वेदस्य अपौरुषेयत्वमङ्गीक्रियते। वेदः ऋषिना दृष्टः, न रचितः। अतः अपौरुषेयः। वेदस्य कर्तारूपः पुरुषः नास्ति। श्रुतिः - **"न पौरुषेयत्वं तत्कर्तुः पुरुषस्य अभावात्"**[6] इति। वेदः श्रुतिषु स्मृतिषु च यत्र यत्र नित्यः इति श्रूयते सांख्यमते तस्य अर्थः गुरुशिष्यपरम्परायाः अविच्छिन्नः प्रवाहः। परमेश्वर इव नास्ति वेदस्य कूटस्थनित्यता, सूक्तभेदे ऋषिभेदात्। अतः ऋषेः पूर्वं तस्य वेदमन्त्रस्य अस्तित्वं नासीत्। अतः वेदस्य प्रवाहनित्यता स्वीक्रियते न तु कूटस्थनित्यता।

---

[1] ब्रह्मसूत्रम् 1.1.3

[2] ब्रह्मसूत्रशाङ्करभाष्यम् – 1.1.3

[3] शु.य.वे.श.ब्रा. – 6.1.1.4

[4] कृ.य.वे.तै.ब्रा. – 2.3.10.1

[5] ब्र.सू. – 1.3.29

[6] सांख्यसूत्रम् – 5.46

व्याकरणस्य मतम्(पतञ्जलिः) - पतञ्जलिमहाभाष्ये वेदस्य नित्यता इत्यस्मिन् विषये आलोच्यते। पाणिनिना रचितं सूत्रं - *"तेन प्रोक्तम्"* इति सूत्रे भाष्ये महर्षिपतञ्जलिना वेदस्य नित्यता विषये उच्यते। तेषामिदमभिमतं यत् वेदस्य नित्यता विचारप्रसङ्गे वेदस्य शब्दार्थौः विचारः करणीयः। वेदस्य अर्थः नित्यः किन्तु शब्दराशिः वर्णानुपूर्वी वा अनित्या। "**अथो नित्यः, या तु असौ वर्णानुपूर्वी सा अनित्या**" इति। प्रतिकल्पे महाप्रलये वेदाक्षरस्य विनाशो भवति। प्रतिकल्पे ऋषयो वेदं स्मरन्ति। तेन वर्णस्य नाशेऽपि अर्थस्य नित्यता तिष्ठति। वर्णानुपूर्वीभेदकारणात् वेदस्य शाखाभेदः उत्पद्यते। अतः पातञ्जलमते वेदः शब्ददृष्ट्या अनित्यः, अर्थदृष्ट्या नित्यः।

न्यायदर्शनस्य मतम् - न्यायदर्शने वेदस्य शब्दस्य वा नित्यता नैव स्वीक्रियते। वेदस्य अनादि-अनन्त-कूटस्थनित्यता न्यायदर्शने न स्वीक्रियते अपि तु प्रवाहनित्यता स्वीक्रियते। "मन्त्रायुर्वेदवच्च तत्प्रामाण्यम् आप्तप्रामाण्यात्" इति न्यायदर्शनस्य सूत्रस्यास्य भाष्ये वात्स्यायणेन प्रोक्तम् - "मन्वन्तरयुगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यास-प्रयोगाविच्छेदो वेदानां नित्यत्वम्" इति। अर्थात् अतीतभविष्ये, प्रलये, कल्पे वेदस्य यः सम्प्रदायक्रमस्य अभ्यासः प्रयोगश्च अविच्छिन्नरूपेण प्रचलति सैव वेदस्य नित्यता। सा एव प्रवाहनित्यता।

सायणाचार्यस्य मतम् - भाष्यकारः सायणाचार्यः वेदस्य अनाद्यनन्त-एकरूपत्वं नाङ्गीकरोति। ते कथयन्ति वेदस्य नित्यता एककल्पकालस्थायी। प्रतिकल्पे वेदः अभिव्यक्तो भवति, प्रलये च परमेश्वरे विलीनो भवति। प्रवाहनित्यता वेदस्य इति चतुर्वेदभाष्यकारस्य सायणाचार्यस्य अभिमतम्।

उपसंहारः – अत एव पूर्वमीमांसा, वेदान्तः, सांख्यानां मते वेदः अपौरुषेयः, न्यायमते पौरुषेयः। वेदस्य कूटस्थनित्यता केवलं पूर्वमीमांसकाः स्वीकुर्वन्ति। व्याकरणदर्शने पतञ्जलिना वेदस्य अर्थ नित्यः, शब्दराशिश्च अनित्यः इति उच्यते। स्मृतिषु पुराणादिशास्त्रेषु च वेदः नित्यः इति उद्घोष्यते। वेदान्तसांख्यन्यायदर्शनेषु ब्रह्म परमेश्वरो वा वेदस्य कारणत्वेन स्वीक्रियते, पूर्वमीमांसायां तथा न स्वीक्रियते। जैमिनिना शब्दस्य नित्यत्वं प्रतिपाद्यते। तेषां मते वेदस्य नित्यता शब्दस्य नित्यताजनकः। शब्दः नित्यः अतः वेदः नित्य इति।

<u>सहायकग्रन्थाः</u>

4. (सङ्कलित), श. प. (2007). *सांख्यकारिका.* कोलकाता: पश्चिमवङ्ग राच्य पुस्तकपर्षत्.
5. भट्टः, अ. (2001). *तर्कसंग्रहः.* चौखम्बसंस्कृत सीरीज. वाराणसी
6. वसु, ड. य. (1957). *वेदेर परिचय(Begali).* कोलकाता: फर्मा के एल मुखोपाध्याय
7. शङ्कराचार्यः. (2002). *कठोपनिषद्भाष्यम्.* गोरखपुर: गीताप्रेस.
8. शङ्कराचार्यः. (2002). *तैत्तिरीयोपनिषद्भाष्यम्.* गोरखपुर: गीताप्रेस

<u>Author's Detail</u>
Address: Asst. Professor, Dept. of Vedanta
Central Sanskrit University
Ekalavya Campus, Lembuchera,
West Tripura, 799210

****

संस्कृत साहित्य में बाल लेखनोपक्रम – समग्रपर्यालोचन

Samkṛta Sāhitya Meṃ Bāla Lekhanopakrama – Samagraparyālocana

Prof. Dr. Vatsala

Abstract

The history of children's literature is perhaps as ancient as the history of human development. The origin and development of children's literature has been passed down from generation to generation by the elders of the family through fables and folktales. There is no clear mention of this in the history texts of ancient Sanskrit literature that when did the tradition of children's writing begin in Sanskrit literature. Books like Panchatantra and Hitopadesh etc. are considered to be the origin of story literature. The stories contained in it are suitable for children; hence some scholars believe that children's literature originated from these texts. Children's songs were widely used in films. These songs became very popular and were sung to children in every home with the vocal voices of mothers. Keeping in mind the mental level of a child aged between five or six years to sixteen years, more literature will be counted in the category of children's literature which has been written. By adopting stories from our religious and mythological texts, children's stories in Hindi language became popular in every home. Therefore, we can say that the rich tradition of children's literature in Hindi developed through the stories contained in our religious scriptures. The tradition of children's writing in Sanskrit literature started in the middle of the twentieth century and this stream continues to flow continuously in the twenty-first century. Writers have published many children's books; an attempt has been made to mention them in this research paper. Along with this, details of some children's magazines and e-magazines have also been cited. In conclusion, this research paper presents a critical look at the overall aspects of children's literature.

Keywords - children's literature, Religious story, historical story, magical and adventure story, folk and legend, social story.

[शोधसार

बाल साहित्य का इतिहास शायद उतना ही प्राचीन है जितना मानव के विकास का इतिहास। बाल साहित्य का उद्भव व विकास दंतकथाओं व लोककथाओं के माध्यम से घर के बुजुर्गों के द्वारा पीढ़ी दर पीढ़ी श्रुति - परंपरा से हस्तांतरित होता रहा है। संस्कृत साहित्य में बाल लेखन की परंपरा का प्रारंभ कब से हुआ? इसका स्पष्ट उल्लेख प्राचीन संस्कृत साहित्य के इतिहास ग्रंथों में नहीं मिलता है। पंचतंत्र व हितोपदेश आदि पुस्तकों से कथा साहित्य का उत्स माना जाता है। इसमें निबद्ध कथाएं बालोपयोगी हैं इसलिए कुछ विद्वान इन ग्रंथों से ही बाल साहित्य का उद्भव मानते हैं। बालगीतों का चलन बहुलता से फिल्मों में हुआ। ये गीत बहुत चर्चित हुए और घर-घर में माताओं के मुखारविंदों से बच्चों के लिए गाये गये। बाल साहित्य की श्रेणी में और साहित्य को परिगणित किया जायेगा जो पाँच या छ: वर्ष से

लेकर सोलह वर्ष तक आयु के बच्चे के मानसिक स्तर को ध्यान में रखकर लिखा गया हो। हमारे धार्मिक व पौराणिक ग्रंथों से कथाओं को गृहीत कर हिंदी भाषा में घर-घर में बालकथायें प्रचलित हुई। अतः हम कह सकते हैं कि हिंदी में बाल - साहित्य की समृद्ध परंपरा का विकास हमारे धर्मग्रंथों में निबद्ध कथाओं के माध्यम से हुआ। संस्कृत वाङ्मय में बाल लेखन की परंपरा का उपक्रम बीसवीं सदी के मध्य से आरंभ हुआ और इक्कीसवीं शताब्दी में यह धारा अविरल प्रवाहमान है। साहित्यकारों ने अनेक बाल पुस्तकों का प्रणयन किया है जिनका नामोल्लेख करने का प्रयास इस शोधपत्र में किया गया है। इसके साथ ही कुछ बाल- पत्रिकाओं व ई - पत्रिकाओं का भी विवरण दिया किया गया है। निष्कर्षतः इस शोधपत्र में बाल साहित्य के समग्र पहलुओं पर पर्यालोचनात्मक दृष्टि डाली गयी है।]

कुञ्चीशब्दः - धार्मिक कथा, ऐतिहासिक कथा, तिलस्मी व ऐय्यारी कहानी, लोक व दंतकथा, सामाजिक कथा।

****

संस्कृत साहित्य में बाल साहित्य और बाल लेखन की परंपरा के उपक्रम और उपसंहार से पूर्व बाल साहित्य और बाल लेखन की पृष्ठभूमि, उसके इतिहास तथा आरंभ के पौर्वापर्य पर प्रकाश डालना समीचीन होगा। बाल साहित्य का इतिहास शायद उतना ही प्राचीन है जितना मानव के विकास का इतिहास। संस्कृत साहित्य में बाल साहित्य लेखन का आरंभ कब से हुआ?, इसकी सीमा रेखा का निर्धारण प्राचीन संस्कृत साहित्य के इतिहास ग्रंथों में नहीं किया गया है। ना ही संस्कृत साहित्य के ऐतिहासिक सुप्रसिद्ध ग्रंथों में बाल साहित्य का कहीं उल्लेख प्राप्त होता है।

परंपरागत संस्कृत साहित्य पर व्यापक दृष्टिपात करने से यह ज्ञात होता है कि प्राचीन संस्कृत वाङ्मय बाल काव्य साहित्य से रिक्त तो नहीं कहा जा सकता है किंतु ईषत्स्पृष्ट अवश्य रहा है। पौरस्त्य साहित्य की तुलना में पश्चवर्ती साहित्य में बाल लेखन की परंपरा समृद्ध हुई है। संस्कृत साहित्य में वात्सल्य रस से पूर्ण बाल वर्णन के अनेक सुंदर प्रसंग प्राप्त होते हैं। रामायण में राम के बाल स्वरूप की कथा, लव-कुश की कथा, महाभारत में कौरव-पांडव तथा अभिमन्यु आदि का वर्णन मिलता है। महाकवि कालिदास ने 'कुमारसंभव'[1] महाकाव्य में कुमार कार्तिकेय की बाललीलाओं का तथा 'रघुवंश'[2] महाकाव्य में रघु की बाल सुलभ क्रीडाओं का अभिराम चित्रण किया है। प्राचीन साहित्य में वात्सल्य रस पूर्ण वर्णन तो उपलब्ध होता है किंतु बाल साहित्य का समृद्ध एवं परिनिष्ठित स्वरूप परिलक्षित नहीं होता है।

मानव के विकास के साथ ही शनैः - शनैः बाल साहित्य का उद्भव दंतकथाओं व लोककथाओं के माध्यम से घर के बुजुर्गों दादा-दादी, नाना-नानी, माता-पिता द्वारा बच्चों को लोरी से लेकर प्रभाती गाकर सुनाने के रूप में एक कंठ से अन्य कंठ तक सुर की सुरम्य स्वरलहरियों के माध्यम से हस्तांतरित होता रहा है। बालगीत व कथायें बालकों को एकाग्र (दत्तचित्त) करने के उद्देश्य से, समय के सदुपयोग की दृष्टि से, ज्ञान के अभिवर्द्धनार्थ, परियों ,भूत-प्रेतों, रामायण,

---

[1] कुमारसम्भवम् -11/42-49

[2] रघुवंशम्-3/24-26

महाभारत, पुराणादि की कहानियों को सुनाने की परंपरा के द्वारा विकास के सोपान पर आरुढ़ हुआ। वृद्धजन द्वारा बाल्यावस्था में बच्चों को स्मरण करायी गयी किञ्चित् कविताओं की वानगी देखिए-

1. **लाठी लेकर भालू आया छम छम छम छम**

   ढोल बजाता मेंढक आया ढम ढम ढम ढम

   मेंढक ने ली मीठी तान और गधे ने गाया गाना - द्वारिका प्रसाद माहेश्वरी

2. **चूँ चूँ करती आयी चिड़ियाँ दाल का दाना लायी चिड़ियाँ**

   मोर भी आया कौवा भी आया चूहा भी आया बंदर भी आया

   खौं, खौं, खौं, खौं, खौं[1]

एक समय में उपर्युक्त कविताएं बड़ी लोकप्रिय थी। हमारे देश में संयुक्त परिवार की प्रथा थी। संयुक्त परिवार में ग्रीष्मावकाश व अन्य धार्मिक आयोजनों में होने वाले अवकाश के दिनों में जब बच्चे एक साथ परिवार में एकत्र होते थे तब घर में पितामह-पितामही, मातामह-मातामही, पितरौ द्वारा नाना प्रकार की कहानियों को सुनाने की परिपाटी (चलन) थी। इन कहानियों को कई भागों में वर्गीकृत किया जा सकता है :-

1. **धार्मिक कथाएं** - रामायण, महाभारत और पुराणों से संबंधित कहानियां यथा- राम-सीता, लव-कुश, रावण, कुंभकरण, शूर्पणखा, कौरव-पांडव, कर्ण, दधीचि, ध्रुव, बुद्ध, नचिकेता, देवी-देवताओं दानवों से संबंधित कहानियां।
2. **ऐतिहासिक कथाएं-** ऐतिहासिक महापुरुषों यथा- वीर शिवाजी, महाराणा प्रताप, झांसी की रानी, चंद्रशेखर आजाद, भगतसिंह, पन्ना धाय, देशभक्त वीर सपूतों, अकबर-बीरबल आदि की कहानियाँ।
3. **तिलस्मी व ऐय्यारी कहानियाँ-** जासूसी कहानियाँ, समुद्री यात्राओं, व्यापार तथा व्यापारियों आदि से संबंधित कहानियाँ।
4. **लोक व दंतकथाएं-** राजा-रानी, परियों, पशु-पक्षियों से संबंधित कथाएँ।
5. **सामाजिक कथाएँ-** सौतेली माँ, सौतेले बाप, सौतेले बच्चों व भाइयों से संबंधित कथाएँ, सामाजिक उत्सव, पर्व, मेले की कहानियाँ ।

लोककथाएँ और बाल साहित्य दोनों ही एक दूसरे के पूरक हैं। लोककथाओं व दंतकथाओं के रूप में बाल साहित्य का विपुल भंडार है जो पीढ़ी दर पीढ़ी श्रुति परंपरा से हस्तांतरित होता चला आ रहा है। इन कथाओं के माध्यम से बच्चों में जिज्ञासा, कल्पना, संवेदना, देशप्रेम, त्याग, शौर्य, अनुराग आदि की भावना व गुणों का विकास होता है। इन कथाओं का उद्देश्य बालकों को नीति व आदर्श की शिक्षा देना था। प्राचीन काल में आधुनिक युग की भांति घरों में टेलीविजन या अन्य सूचना संप्रसारण के साधन नहीं थे। केवल रेडियो के माध्यम से कहानियाँ प्रसारित की जाती थी। बालगीतों के प्रसारण व श्रवण का रेडियो एक सुलभ साधन था। फिल्म जगत में 60-70 के दशक में कुछ बाल गाने

[1] अंतर्जाल

बड़े ही लोकप्रिय थे और घर में माताओं द्वारा बच्चों को खाना खिलाते और शयन कराते वक्त प्राय: गाकर सुनाए जाते थे। कतिपय गीत पंक्तियाँ अवलोकनीय हैं :-

1. **चन्दामामा आरे आवा पारे आवा**
   नदियाँ किनारे आवा, सोना के कटोरिया में दूध भात
   लै आवा, बबुआ के मुँहवा में घुटूँ – फिल्म-भौजी[4]
2. **चन्दामामा दूर के, पुए पकाए बूर के, आप खाये थाली में,**
   मुन्ने को दे प्याली में, प्याली गयी टूट मुन्ना गया रूठ – फिल्म-वचन
3. **दादी अम्मा दादी अम्मा मान जाओ, छोड़ो जी ये गुस्सा जरा हँस के दिखाओ – फिल्म-घराना[4]**
4. **नानी तेरी मोरनी को मोर ले गये, बाकि जो बचे थे काले चोर ले गये**
5. **तितली उडी, उड जो चली, फूलों ने कहा,**
   आ जा मेरे पास, तितली कही, मैं चली आकाश – फिल्म-सूरज[1]

रेडियो पर फिल्मों में फिल्माए गए ये गाने तत्कालीन समय में बहुत ही लोकप्रिय व कर्णप्रिय थे और बच्चों को बहलाने व फुसलाने के साधन थे। अधुना फिल्मी गीतों का संस्कृत रूपांतरण किया जा रहा है अतः इन फिल्मी गीतों (बालगीतों) का भी संस्कृत भाषा में लिप्यान्तरण किया जाना चाहिए।

इस प्रकार बालगीत व बाल कहानियाँ हमारी पारिवारिक, सामाजिक, सांस्कृतिक चेतना में अभिव्याप्त होते हुए साहित्यिक चेतना के पटल पर प्रसृत हुई हैं।

संस्कृत में बाल साहित्य लेखन की परम्परा का सूत्रपात बीसवीं शताब्दी के मध्य से प्रारम्भ हुआ और इक्कीसवीं शताब्दी के आरम्भ से गतिमान हुआ है। इससे पूर्व संस्कृत साहित्य में बाल साहित्य का लेखन उपलब्ध नहीं होता है। जो विशेषकर बच्चों को केंद्रित करके लिखा गया हों। बाल साहित्य लेखन सम्प्रति संस्कृत साहित्य में उन्मीलन व उन्नयन काल में अवस्थित है, ऐसा कहा जा सकता है। चूँकि बाल साहित्य के पहले बाल शब्द सम्पृक्त है अत: बाल शब्द साभिप्राय है और साहित्य का विशेषण है। इसलिये इसके अभिप्राय के सम्यग्तया परिशीलन के लिये 'बाल' शब्द की पक्षधरता पर विमर्श आवश्यक है।

हमारी संस्कृति में मनुष्य जीवन को चार अवस्थाओं में विभाजित किया गया है:- बाल्यावस्था, युवावस्था, प्रौढ़ावस्था और वृद्धावस्था। इसी प्रकार बाल शिक्षा मनोविज्ञान में बाल विकास की चार अवस्थाओं का निर्धारण किया गया है:- शैशवावस्था- 0-5, बाल्यावस्था- 5 या 6 से 12 वर्ष, किशोरावस्था या युवावस्था- 12 से 18 या 19 वर्ष, प्रौढ़ावस्था- 19 से 35 वर्ष। शिक्षा मनोविज्ञान के अनुसार बाल्यावस्था 12 वर्ष तक मानी गयी है।

'वाचस्पत्यम्'[2] में बाल अवस्था को इस प्रकार निरूपित किया गया है:-

---

[1] अंतर्जाल

[2] वाचस्पत्यम्- षष्ठोभाग- पृष्ठ-4570

'बाल आषोडशाद्वर्षात्' (सोलह वर्ष के अवधि तक का बालक)

'षोडशवर्षावधिवयस्के च' – त्रिरत्नकोश

(सोलह वर्ष की अवधि के आयु वाले में भी बाल शब्द का प्रयोग समझा जाता है।)

'ऊनषोडशवर्षस्तु नरो बालो निगद्यते' – सुश्रुत संहिता

(सोलह वर्ष से कम उम्र वाला व्यक्ति बालक समझा जाता है।)

उपर्युक्त उद्धरण 'बाल' शब्द का प्रत्यायक है। अतएव सोलह वर्ष की आयु के बालक को बाल्यावस्था के अन्तर्गत परिगणित किया जायेगा तथा जो साहित्य इस आयु विशेषानुसार लिखा जाये उसे बाल साहित्य कहा जायेगा। बाल्यावस्था जीवन का अनोखाकाल होता है। इस अवस्था में बालक का विकास बडी तीव्र गति से होता है। पारिवारिक, सामाजिक, राजनैतिक परिस्थितियों का अत्यधिक प्रभाव बालक के ऊपर पड़ता है। इस अवस्था में सीखने की प्रवृत्ति बडी तीव्र होती है। इस आयु में बालकों में अधिगम की प्रवृत्ति अनुकरण पर आधृत होती है। काव्यशास्त्र में संकेतग्रह के उपाय में लोकव्यवहार (आवापोद्वाप) की जिस प्रक्रिया का उल्लेख किया गया है वह पद्धति भी अनुकरण पर ही आधृत है। अनुकरणात्मक प्रवृत्ति से अधिगम की प्रक्रिया सुगम व सहज होती है। यही कारण है कि इस कालावधि में वह जो कुछ अधीत करता है या जो उसे अध्यापित कराया जाता है, वे समग्र विषय उसके मानस पटल पर अमिट अंकित हो जाते हैं।

बाल साहित्य के अंतर्गत उसी साहित्य को सम्मिलित करना उपादेय होगा जो पाँच या छ: वर्ष के लेकर सोलह वर्ष तक आयु के बच्चों के मानसिक स्तर को ध्यान में रखते हुए रचित किया गया हो। इस अवस्था में बच्चों में जिज्ञासा (कौतूहल) की प्रवृत्ति, एकाग्रता (तन्मयता) का प्राबल्य, रचनात्मकता तथा मानसिक क्षमता में वृद्धि के साथ ही विचारों की प्रचुरता विद्यमान होती है। इन प्रवृत्तियों को ध्यान में रखकर जो कविताएँ या कहानियाँ लेखनीबद्ध की जाती है, वे बालकों और इन गुणों के विकास करने के साथ ही उसके मस्तिष्क का विरेचन भी करती है। ऐसे गुणोपेत साहित्य को बाल साहित्य कहेंगे।

उपर्युक्त विवेचन के आधार पर बाल साहित्य को स्वमन्तव्यानुसार इस प्रकार परिभाषित कर सकते हैं- 'जो साहित्य बालकों की आयु के अनुसार उनके मानसिक स्तर को ध्यान में रखकर लिखा जाये, जो कलेवर में लघुकाय हो, भाषा-शैली सरल-सहज हो, जो बालकों को बोधगम्य होने में सुगम व सार्थक होने के साथ शिक्षाप्रद हो। कभी-कभी कहानियों व कविताओं को चित्रों के माध्यम से लेखनीबद्ध किया जाये जो रोचक तथा बालकों को दत्तचित्त करने में सक्षम हो।' बाल साहित्यान्तर्गत कविताएँ व कहानियाँ ही प्रमुख है किन्तु आधुनिक युग में लघु नाटक भी बालकों के लिये प्रणीत किये जा रहे हैं।

कतिपय साहित्यकार संस्कृत साहित्य में बाल लेखन की परम्परा का प्रादुर्भाव पंचतंत्र व हितोपदेश से मानते हैं क्योंकि ये कथायें राजाओं के मूर्ख राजपुत्रों को नैतिक व आदर्श परक शिक्षा प्रदान करने के उद्देश्य से प्रणीत की गयी थी। इसी प्रकार वेतालपंचविंशतिका, सिंहासनद्वात्रिंशिका, शुकसप्तति, जातक आदि की कथायें भी है। इन्हीं कथाओं को

कथा साहित्य की उत्पत्ति का उत्स माना जाता है। इन कथाओं को बाल साहित्य के अन्तर्गत गृहीत किया जाये अथवा नहीं यह एक अलग विषय है किन्तु ये कथायें बालमनोविज्ञान की दृष्टि से लिखी गयी प्रतीत होती है। बालकथा की पृष्ठभूमि में संस्कृत साहित्य के महनीय धार्मिक ग्रंथों रामायण व महाभारत का भी विपुल योगदान है। धार्मिक व पौराणिक लघु कथायें हमारे धर्मग्रंथों से गृहीतकर हिन्दी भाषा के माध्यम से गृह-गृह में बच्चों को सुनायी जाती थी। लेकिन इन कहानियों का लेखन संस्कृत भाषा में नहीं था लार्ड मैकाले ने 1835ई. में संस्कृत के स्थान पर अंग्रेजी को राजभाषा का स्थान दे दिया। संस्कृत लोक व्यवहार की भाषा नहीं थी। यही कारण है कि हिंदी में बाल साहित्य के समृद्ध परंपरा का विकास व सूत्रपात संस्कृत साहित्य के धार्मिक पुस्तकों में निबद्ध कथाओं से हुआ। हिंदी बाल साहित्य में भी बच्चों को दी जाने वाली सीख ही उपलब्ध होती है। आधुनिक हिंदी के निर्माता भारतेंदु ने बाललेखन के अभिवर्द्धन हेतु 1882 में 'बालदर्पण' नामक पत्रिका का प्रकाशन किया था। हिंदी साहित्य बाल साहित्य में मौलिक, सामयिक तथा उद्देश्यपूर्ण लेखन का विधिवत आरंभ बीसवीं शताब्दी के दूसरे दशक से देखने को मिलता है। लल्ली प्रसाद पांडे के संपादन में 'बालसखा' (1917) पत्रिका 53 वर्षों तक प्रकाशित होती रही। बालहंस , बालभारती, चंदामामा, चंपक, नंदन, पराग आदि मासिक बाल-पत्रिकाएं हिंदी साहित्य में प्रकाशित हुई। चंदामामा (1947), नंदन (1964), चंपक (1968) आज भी प्रकाशित हो रही है जबकि शेष कालकवलित हो गयी। हिंदी में बाल साहित्य पर लिखने वाले साहित्यकारों की लंबी सूची है, स्थालीपुलकन्याय से कतिपय नामावलियाँ इस प्रकार है:- सोहनलाल द्विवेदी, राजकुमार वर्मा, मैथिलीशरण गुप्त, रामनरेश त्रिपाठी, मुंशी प्रेमचंद, सुभद्रा कुमारी चौहान, द्वारिका प्रसाद माहेश्वरी, श्याम नारायण पांडेय, सर्वेश्वर दयाल सक्सेना, कमलेश्वर, बाबू गुलाबराय, अयोध्या सिंह उपाध्याय हरिऔध, महादेवी वर्मा आदि। इन कवियों का समय सामाजिक जनजागरण तथा स्वतंत्र आंदोलन का था। अतः इस कालखंड में लिखित बाल साहित्य में स्वाभाविक रूप से आदर्शपरक, नीतिपरक तथा देशप्रेम की भावना से ओतप्रोत रचनाओं की ही अधिकता थी। कतिपय कवितांश अवलोकनीय है:-

1. **रण बीच चौकड़ी भर भर कर चेतक बन गया निराला था**
छन्दोविवेचना-प्रसङ्गे समनुभूयते यत् कवेः हरेकृष्ण-मेहेरस्य लेखनी विविध-च्छन्दोरचनायां सुनिपुणा। तस्य काव्यकृतिषु नाना-पारम्परिक-च्छन्दसां यथास्थानं सम्यक् प्रयोगः परिलक्ष्यते। कविना प्रायः विविधानि सम-पादानि वृत्तानि सन्निवेशितानि। क्वचित् अर्धसम-वृत्तस्य व्यवहारः कृतः। कतिपय-च्छन्दसां परस्पर-पादमिश्रणेन सृष्टानि उपजाति-च्छन्दांसि अपि कविना प्रयुक्तानि। प्रचलितेषु छन्दःसु कविना विविध-वर्णवृत्तानां व्यवहारो विहितः। तेन मुख्यतः अनुष्टुप्, प्रमाणिका, इन्द्रवज्रा, उपेन्द्रवज्रा, रथोद्धता, इन्दिरा, वंशस्थम्, इन्द्रवंशा, द्रुतविलम्बितम्, तोटकम्, भुजङ्गप्रयातम्, स्रग्विणी, वसन्ततिलका, मालिनी, मन्दाक्रान्ता, शिखरिणी, शार्दूल-विक्रीडितम्, स्रग्धरा चेत्यादीनि छन्दांसि प्रयुक्तानि सन्ति। कवेः रचनासु व्यवहृतानां कतिपयानां मुख्यच्छन्दसां वर्णसंख्यानुक्रमेण अनुशीलनं निम्नरूपेण प्रस्तूयते।

अनुष्टुप् (अष्टाक्षरं वृत्तम्) - छन्दःशास्त्रे अनुष्टुप्-छन्दः श्लोकः इति नाम्नापि परिचितम्। तस्य लक्षणं श्रुतबोधे निरूपितमस्ति

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्वि-चतुष्पादयो-र्ह्रस्वं सप्तमं दीर्घमन्ययोः॥[1]

अनुष्टुप्-छन्दः लोक-व्यवहारे प्रायः एतल्लक्षणयुक्तमेव अष्टाक्षर-वृत्तमिति परिचितं वर्त्तते। छन्दोमञ्जर्यां तस्मिन् विषये वर्णितमस्ति :

पञ्चमं लघु सर्वत्र सप्तमं द्वि-चतुर्थयोः।
गुरु षष्ठं च जानीयात् शेषेष्वनियमो मतः ॥
प्रयोगे प्रायिकं प्राहुः केऽप्येतद् वृत्त-लक्षणम्।
छन्दोऽनुष्टुबिति ख्यातं तस्याष्टक्षरता मता ॥[2]

छन्दसि यस्मिन् प्रायतः प्रतिपादं पञ्चम-वर्णो लघुः, षष्ठ-वर्णो गुरुः, द्वितीय-चतुर्थ-पादयोः सप्तम-वर्णो ह्रस्वो भवति, अन्ययोः अर्थात् प्रथम-तृतीययोः पादयोः सप्तम-वर्णो दीर्घो भवति, तत् अनुष्टुप् इति कथ्यते। अन्येषु वर्णेषु स्वतन्त्र-नियमो नास्ति। अस्य अपरं नाम श्लोकः इति परिचितम्। असूचिते सति पादान्त-वर्णे यतिपातो भवति। अत्र प्रतिचरणम् अष्टाक्षराणि भवन्ति। कवेः मेहेरस्य 'सूक्ति-कस्तूरिका' इति काव्ये अनुष्टुप्-छन्दसः प्रयोगः परिदृश्यते। पद्यद्वयं प्रस्तूयते उदाहरण-स्वरूपम्, **खादितुमेव जीवन्ति पर-वित्तापहारकाः।**

जीवितुमेव खादन्ति केचिल्लोक-हित-व्रताः ॥'
'यः पार्थक्यमविज्ञाय तत्त्वानां गुण-दोषयोः।
छिद्रमन्विष्यति क्षुद्रं दोषदृक् स विषीदति ॥[3]

---

[1] श्रुतबोधः,४

[2] छन्दोमञ्जरी, पञ्चमः स्तवकः

[3] सूक्ति-कस्तूरिका, १४, १५

कवेः 'स्तवार्चन-स्तवकम्' इति स्तोत्रकाव्यस्य 'श्रीदुर्गाष्टकम्' इत्यत्रापि अनुष्टुप्-छन्दसो व्यवहारः कृतः। उदाहरण-स्वरूपं श्लोकद्वयं प्रस्तूयते :

'ज्ञानं विद्या धृतिः प्रज्ञा राजसे श्री-र्यशस्विनी।
संस्थिता विश्वसंसारे शक्तिरूपा त्वमम्बिका ॥[1]

स्वभावकवि-गङ्गाधरमेहेर-प्रणीतस्य प्रसिद्धस्य तपस्विनी-महाकाव्यस्य संस्कृतानुवादः कविना हरेकृष्ण-मेहेरेण कृतोऽस्ति। तस्यानुवादस्य प्राक्कथने कविना श्रीमेहेरेण अनुष्टुप्-छन्दस: व्यवहारः कृतः। यथा,

'जानकी नायिका यत्र श्रीराम-सहधर्मिणी।
सती-शिरोमणी साध्वी पतिव्रता तपस्विनी ॥
वाणी भावमयी स्निग्धा प्रधानः करुणो रसः।
दर्शनीयं निसर्गस्य चित्रणं चात्र मञ्जुलम् ॥[2]

उपर्युक्तेषु उदाहरणेषु साधारणतया अष्टाक्षरस्य प्रचलितस्य अनुष्टुप्-छन्दस: लक्षणं वर्त्तते।

प्रमाणिका (अष्टाक्षरं वृत्तम्) - छन्दःशास्त्रे प्रमाणिकायाः लक्षणमेवं निरूपितमस्ति **'प्रमाणिका जरौ लगौ॥**[3] अस्मिन् प्रमाणिका-नाम्नि चतुष्पादे वृत्ते प्रतिपादं क्रमेण ज-र-गणौ एको लघुवर्णः एको गुरुवर्णश्च भवन्ति। असूचिते सति पादान्त-वर्णे यतिपातो भवति। अत्र प्रतिचरणम् अष्टाक्षराणि सन्ति। कवे: मेहेरस्य 'स्तवार्चन-स्तवकम्' इति काव्यस्य 'स्वरमङ्गला-वन्दना' इति कवितायां प्रमाणिका-च्छन्दस: प्रयोगो दृश्यते। सम्पृक्तं पद्यमेवं प्रस्तूयते :

'विराजते विनोदिनी पवित्रतां वितन्वती।
सुमङ्गलं ददातु नो विभास्वरा सरस्वती॥'[4]

इन्द्रवज्रा (एकादशाक्षरं वृत्तम्) : - छन्दःशास्त्रे इन्द्रवज्रायाः लक्षणम् - **स्यादिन्द्रवज्रा यदि तौ जगौ गः॥**[5]' यस्य चतुर्षु पादेषु क्रमेण तगणः, तगणः, जगणः, गुरुवर्ण-द्वयं च भवन्ति, तत् इन्द्रवज्रा नाम वृत्तं निगदितम्। असूचिते सति चरणान्त-वर्णे यतिपातो भवति। अत्र प्रतिपादम् एकादशाक्षराणि भवन्ति। कवेः 'पुष्पाञ्जलि-विचित्रा'-काव्यस्य 'पूज्य-पूजनम्' इति कवितायाः इन्द्रवज्राच्छन्दसः उदाहरणमेकम्

'लक्ष्मी-स्वरूपा गृहिणी सुधात्री
प्रेमास्पदं या महनीय-मूर्त्तिः।
उर्वीव सर्वं सहते सुहासा

---

[1] श्रीदुर्गाष्टकम्, ४

[2] तपस्विनी, प्राक्कथनम्, पृ. ११

[3] छन्दोमञ्जरी, २/४०; वृत्तरत्नाकरम्, ३/१९

[4] स्वरमङ्गला-वन्दना, ५

[5] छन्दोमञ्जरी,२/७२; वृत्तरत्नाकरम्,३/३०

माता सुवन्द्या ममतामयी सा ॥[1]

उपेन्द्रवज्रा (एकादशाक्षरं वृत्तम्) - लक्षणम् : **'उपेन्द्रवज्रा प्रथमे लघौ सा ॥'** (छन्दोमञ्जरी,२/७४).

'उपेन्द्रवज्रा जतजास्ततो गौ ॥[2]

यदि इन्द्रवज्राच्छन्दस: प्रतिपादं प्रथम-वर्णो लघुर्भवति, तर्हि तत् उपेन्द्रवज्रा नाम वृत्तमिति निरूप्यते। अर्थात् प्रतिपादं क्रमेण जगणः, तगणः, जगणः, गुरुवर्णद्वयं च भवन्ति। असूचिते सति पादान्ते यतिपातो भवति। अस्मिन् छन्दसि प्रतिचरणम् एकादशाक्षराणि भवन्ति। कवेः 'पुष्पाञ्जलिविचित्रा'-काव्यात् 'पूज्य-पूजनम्' इति कवितायाः उपेन्द्रवज्रा-च्छन्दसः उदाहरण-स्वरूपं पद्यमेकं प्रस्तूयते :

'नमामि सर्वान् कवि-काव्यकारान्

समाज-कल्याण-विधौ हि येषाम्।

सुलेखनी सञ्चलिता सुवाण्या

वरेण्य-वर्णा महतां प्रशस्या ॥[3]

रथोद्धता (एकादशाक्षरं वृत्तम्) : - लक्षणम् : **'रात् परै-र्नरलगै रथोद्धता॥**[4] रथोद्धता इति चतुष्पादे एकादशाक्षरे वृत्ते प्रतिपादं क्रमेण र-गणः, न-गणः, र-गणः, एको लघुवर्णः, एको गुरुवर्णश्च भवन्ति। असूचिते सति अत्र पादान्त्यवर्णे यतिर्भवति। कवेः मेहेरस्य 'पुष्पाञ्जलिविचित्रा'-काव्यात् 'जाह्नवी'-कवितायाः उदाहरणमेकम् :

'राग-रङ्गिम-तरङ्ग-मालया

मञ्जुला सरस-नाद-गुञ्जना।

शं तनोतु मधुरा सुधा-रया

ताप-वह्नि-हरणीह जाह्नवी ॥[5]

इन्दिरा (एकादशाक्षरं वृत्तम्) - लक्षणम् - **'नररलै-र्गुराविन्दिरा मता॥**[6] इन्दिरा इति चतुष्पादे एकादशाक्षरे वृत्ते प्रतिपादं क्रमेण न-गणः, र-गणद्वयं, एको लघुवर्णः एको गुरुवर्णश्च भवन्ति। असूचिते सति अत्र पादान्ते वर्णे यतिपतो भवति। कवेः मेहेरस्य 'स्वस्तिकविताञ्जलिः'-काव्यात् 'दुर्गादेवी-दशकम्' इति कवितायाः उदाहरणमेकम् :

'वृजिन-भञ्जिनी मञ्जुलानना

सुजन-रञ्जिनी कञ्ज-लोचना।

---

[1] पूज्य-पूजनम्,७

[2] वृत्तरत्नाकरम्,३/३१

[3] पूज्य-पूजनम्,५

[4] छन्दोमञ्जरी,२/९२

[5] जाह्नवी,१

[6] छन्दोमञ्जरी, द्वितीयस्तवकः, पृ.१०८, सु.राजस्य पुस्तकम्

जगति पूजिता गर्व-गञ्जिनी

भवतु ते कृपा शान्ति-शिञ्जिनी ॥[1]

वंशस्थम् अथवा वंशस्थविलम् (द्वादशाक्षरं वृत्तम्) : - वंशास्थस्य एवं निरूप्यते लक्षणम् :

'जतौ तु वंशस्थमुदीरितौ जरौ ॥[2]

'वदन्ति वंशस्थविलं जतौ जरौ ॥[3]

यस्य चतुर्षु चरणेषु प्रतिपादं जतौ जरौ अर्थात् क्रमेण जगणः, तगणः, जगणः, रगणश्च भवन्ति, तत् वंशस्थम् अथवा वंशस्थ-विलम् इति वृत्तं निगद्यते। असूचिते सति चरणान्ते यतिपातो भवति। अत्र छन्दसि प्रतिचरणं द्वादशाक्षराणि भवन्ति।

उदाहरणार्थं प्रस्तूयते कवेः मेहेरस्य 'पुष्पाञ्जलिविचित्रा'-काव्यात् 'परिणयाभिनन्दनम्' इति कवितायाः वंशस्थ-च्छन्दोबद्ध-पद्यमेकम् : **'प्रभोः प्रसादैः सहिता सुसम्पदा**

शुभानुकम्पा परिपातु दम्पती।

श्रियं समृद्धिं च सदा ददातु वै

प्रसन्नतां सन्निधि-सङ्ग-मङ्गलाम् ॥[4]'

इन्द्रवंशा (द्वादशाक्षरं वृत्तम्) - इन्द्रवंशायाः लक्षणम् - **तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ॥**[5] **स्यादिन्द्रवंशा ततजै र-संयुतैः॥**[6] यस्य चतुर्षु चरणेषु वंशस्थविल-च्छन्दसः गणाः स्युः, किन्तु सर्वेषां पादानां प्रथम-वर्णो गुरुर्भवति, तत् इन्द्रवंशा नाम वृत्तम्। अस्मिन् वृत्ते प्रतिचरणं क्रमेण त-गणद्वयं, ज-गणः, र-गणश्च वर्तन्ते। असूचिते सति पादान्ते यतिपातो भवति। अस्मिन् छन्दसि प्रतिपादं द्वादशाक्षराणि भवन्ति। कविवर-राधानाथराय-कृतायाः 'वर्षा' इति ओडिआ-कवितायाः संस्कृत-पद्यानुवादे कविना श्रीमेहेरेण इन्द्रवंशायाः प्रयोगः कृतः। उदाहरणस्वरूपं पद्यमेकं परिवेष्यते

'श्रीरामचन्द्रो रघुवंश-भूषणं

शैलेऽवसत् प्रस्रवणे सलक्ष्मणः।

तत्पाददेशे शयनेऽश्म-बन्धुरे

गोदावरी झर्झर-गुञ्ज-मञ्जुला॥[7]

---

[1] दुर्गादेवी-दशकम्', ४ / बर्त्तिका-२०२२

[2] वृत्तरत्नाकरम्, ३/४७

[3] छन्दोमञ्जरी, २/११२

[4] परिणयाभिनन्दनम्,१

[5] छन्दोमञ्जरी, २/११४

[6] वृत्तरत्नाकरम्, ३/४८

[7] वर्षा, श्लोकः-१

कवे-र्मेहेरस्य 'स्तवार्चन-स्तवकम्' इति काव्यस्य 'श्रीदुर्गापञ्चकम्' इत्याख्यायां कवितायाम् इन्द्रवंशा-च्छन्दसः प्रयोगः संदृश्यते। ततः पद्यमेकम् **'त्वं सर्वभूते जननी विराजिता**

जैत्री सुगात्री गिरिराज-नन्दिनी।

स्वान्ते जनानां भव शान्ति-सौख्यदा

पादारविन्दे तव नः सुवन्दनम् ॥[1]

तोटकम् (द्वादशाक्षरं वृत्तम्) - लक्षणम् - **वद तोटकमब्धि-सकार-युतम्॥**[2] **'इह तोटकमम्बुधि-सैः प्रथितम्॥**[3] तोटकम् इत्याख्ये अस्मिन् चतुष्पादे द्वादशाक्षरे वृत्ते प्रतिपादं क्रमेण स-गण-चतुष्टयं भवति। असूचिते सति अत्र पादान्त्यवर्णे यतिर्भवति। कवेः मेहेरस्य 'मातृगीतिकाञ्जलिः'-काव्यस्य 'प्रास्ताविकम्' इत्यतः उदाहरणमेकं प्रस्तूयते एवम् **'ललिता मधुरा रसभाव-भरा**

सुकुमार-रुचि-र्नव-काव्य-परा।

प्रिय-देवगवी-प्रवणा सुखदा

मम गीतिरियं कमनीय-पदा॥[4]

द्रुतविलम्बितम् (द्वादशाक्षरं वृत्तम्) - छन्दःशास्त्रे द्रुतविलम्बितस्य लक्षणमित्थं निरूपितम्। **द्रुतविलम्बितमाह नभौ भरौ॥**[5] द्रुतविलम्बितम् इत्याख्ये चतुष्पादे द्वादशाक्षरे वृत्ते प्रतिपादं क्रमेण न-गणः, भ-गणद्वयं र-गणश्च भवन्ति। असूचिते सति अन्त्यवर्णे यतिर्भवति। कवेः मेहेरस्य 'पुष्पाञ्जलिविचित्रा'-काव्यात् 'जाह्नवी'-कवितायाः पद्यमेकं प्रस्तूयते उदाहरणस्वरूपम् **'त्रिपथगा हि भगीरथ-गौरवा**

भुवन-पालन-वर्धन-कारिणी।

विजयते जगतां जननीव सा

चिर-नवा विमला भुवि जाह्नवी ॥[6]

पुनः कवेः 'मातृगीतिकाञ्जलि'-काव्यस्य 'प्रास्ताविकम्' इत्यतः द्रुतविलम्बित-च्छन्दोबद्धं पद्यमेकम् :

'जगति संहत-सङ्गत-शाश्वती

विजयतां प्रिय-भारत-भारती।

भवतु गौरव-सौरभ-भास्वरा

---

[1] श्रीदुर्गापञ्चकम्, ५

[2] छन्दोमञ्जरी, २/१२१

[3] वृत्तरत्नाकरम्, ३/४९

[4] प्रास्ताविकम्,९/ मातृगीतिकाञ्जलिः

[5] वृत्तरत्नाकरम्,३/५०; छन्दोमञ्जरी,२/३०

[6] जाह्नवी, ३

विजयिनी मम देश-परम्परा ॥[1]

कवेः मेहेरस्य 'स्वस्तिकविताञ्जलिः'-काव्यात् 'जयतु भारत-सैनिकवाहिनी' इति कवितायाः द्रुतविलम्बित-च्छन्दोबद्धं पद्यमेकं प्रस्तूयते इत्थम् :

'अरि-विनाशन-चण्ड-धुरन्धरा
प्रहरणादि-सुसज्जित-तत्परा।
अमित-केशरि-शक्ति-समूर्जिता
जयतु भारत-सैनिक-वाहिनी ॥[2]

भुजङ्गप्रयातम् (द्वादशाक्षरं वृत्तम्) - छन्दःशास्त्रे भुजङ्गप्रयातस्य लक्षणमेवरूपं वर्णितम्। **'भुजङ्गप्रयातं चतुर्भिर्यकारैः।**[3] **'भुजङ्गप्रयातं भवेद् यैश्चतुर्भिः।**[4] भुजङ्गप्रयातम् इत्याख्ये अस्मिन् चतुष्पादे द्वादशाक्षरे वृत्ते प्रतिपादं क्रमेण य-गण-चतुष्टयं भवति। असूचिते सति पादान्त्यवर्णे यतिपातो भवति। उदाहरणस्वरूपम्, कवेः मेहेरस्य 'स्तवार्चनस्तवकम्'-स्तोत्रकाव्यस्य 'नमस्ते शिवे गौरि' इति कवितायाः दुर्गास्तुति-परकं भुजङ्गप्रयात-च्छन्दोबद्धं पद्यमेकं प्रस्तूयते

'मनोऽनन्त-दुर्भावना-गर्भितं मे
तमोराशि-लिप्तं विभीतं स्वधर्मे।
कृपार्द्रा सुभद्रं प्रदेहि प्रकाशं
कुरु त्वं कलित्रास-राशे-र्विनाशम् ॥[5]

स्रग्विणी (द्वादशाक्षरं वृत्तम्) - छन्दःशास्त्रे स्रग्विणी-छन्दसः लक्षणम् **'कीर्तितैषा चतूरेफिका स्रग्विणी।**[6] **रैश्चतुर्भि-र्युता स्रग्विणी सम्मता।**[7] स्रग्विणी-नाम्नि अस्मिन् चतुष्पादे द्वादशाक्षरे वृत्ते प्रतिपादं क्रमेण र-गण-चतुष्टयं भवति। असूचिते सति पादान्त्यवर्णे यतिपातो भवति। कवेः मेहेरस्य 'पुष्पाञ्जलिविचित्रा'-काव्यस्य 'जागतिकी' इति कवितायाः स्रग्विणी-च्छन्दोबद्धं पद्यमेकं प्रस्तूयते उदाहरण-स्वरूपम्

'बुद्धिमान् मानवो वित्तवान् वीर्यवान्
शक्तिमान् भक्तिमान् कीर्त्तिमान् कान्तिमान्।
किन्तु मोहान्धकारैः खलु ग्रासितो

---

[1] प्रास्ताविकम्,१७/ मातृगीतिकाञ्जलिः

[2] जयतु भारत-सैनिकवाहिनी, ५

[3] छन्दोमञ्जरी, २/११९

[4] वृत्तरत्नाकरम्, ३/५५

[5] नमस्ते शिवे गौरि, ७

[6] छन्दोमञ्जरी, २/१२३

[7] वृत्तरत्नाकरम्, ३/५६

नाभिजानाति वै स्वात्मरूपान्वयम् ॥[1]

वसन्ततिलकम् अथवा वसन्ततिलका (चतुर्दशाक्षरं वृत्तम्) - वसन्ततिलकच्छन्दसः लक्षणमेवं वर्णितम्। **'ज्ञेयं वसन्ततिलकं तभजा जगौ गः।**[2] **उक्ता वसन्ततिलका तभजा जगौ गः।**[3] यस्य चतुर्षु चरणेषु प्रतिपादं क्रमानुसारं तगणः, भगणः, जगणः, जगणः, तथा गुरुवर्णद्वयं च भवन्ति, तत् वसन्ततिलकं नाम वृत्तम्। अस्मिन् छन्दसि प्रतिचरणं चतुर्दशाक्षराणि प्रयुक्तानि सन्ति। इदं छन्दः वसन्ततिलका इत्यपि कथ्यते। असूचिते सति चरणान्ते यतिपातो भवति। ओड़िआ-कविवरेण राधानाथरायेण रचितायाः 'वर्षा'-कवितायाः संस्कृतानुवादः हरेकृष्ण-मेहेरेण कृतः। तस्मात् उदाहरणस्वरूपं वसन्ततिलक-च्छन्दोबद्धं पद्यमेकं प्रस्तूयते इत्थम् :

'चित्रं प्रपश्य पुरतः सलिले सरस्याः

क्रूराहि-तुण्ड-कवले पतितोऽपि भेकः।

लम्फं प्रदाय तरसा विलपन्नगाली-

दूर्ध्वं पतङ्गम-शिशुं वियति भ्रमन्तम् ॥[4]

कवेः मेहेरस्य 'स्वस्तिकविताञ्जलिः'-काव्यस्य 'सांसारिकम्' इति कवितायां वसन्ततिलका-च्छन्दसः रूपं प्राप्यते। अस्याः पद्यमेकं परिवेष्यते इत्थम् :

'वेशा भवन्तु विविधाः किमु तत्र चित्रं

देशात्मबोध-रचना तनुतां पवित्रम्।

लेशा अपीह सुकृताचरणेषु नित्यं

क्लेशापनोदन-कृते प्रभवन्ति सत्यम् ॥[5]

मालिनी (पञ्चदशाक्षरं वृत्तम्) - मालिनी-छन्दसः लक्षणं छन्दःशास्त्रे निरूप्यते एवंप्रकारकम् : **'न-न-म-य-य-युतेयं मालिनी भोगि-लोकैः ॥**[6] मालिनी-नामके अस्मिन् चतुष्पादे पञ्चदशाक्षरे वृत्ते प्रतिपादं क्रमेण न-न-म-य-य-गणाः भवन्ति। अस्य अष्टमे वर्णे, ततः सप्तमे वर्णे च यतिपातो निरूपितः। उदाहरणस्वरूपं परिवेष्यते कवेः मेहेरस्य 'वर्षा' इति अनूदित-कवितायाः मालिनी-च्छन्दोबद्धं पद्यमेकम्

'भवति जलद-कालो बन्धुरुद्भित-कुलानां

क्षयमलभत पद्मं नात्र किञ्चिद् विचित्रम्।

---

[1] जागतिकी,१

[2] छन्दोमञ्जरी, २/१९१

[3] वृत्तरत्नाकरम्, ३/७९

[4] वर्षा, श्लोकः-२५

[5] सांसारिकम्, ७

[6] छन्दोमञ्जरी,२/२२२; वृत्तरत्नाकरम्,३/८४

सलिलमतिशयं वै तत्कृतेऽभूत् कृतान्तो

ह्यतिशय-धनराशि-र्वत्स ! घोरो दुरन्तः ॥[1]

मन्दाक्रान्ता (सप्तदशाक्षरं वृत्तम्) - मन्दाक्रान्तायाः लक्षणं निरूपितमस्त्येवम्। **'मन्दाक्रान्ताम्बुधि-रस-नगै-र्मो भनौ तौ ग-युग्मम्।**[2] यस्य चतुर्षु चरणेषु क्रमेण मगणः, भगणः, नगणः, तगण-द्वयं, गुरुवर्ण-द्वयं च भवन्ति, तत् मन्दाक्रान्ता नाम सप्तदशाक्षरं वृत्तम्। अत्र चतुर्भिः, षड्भिः , सप्तभिश्च वर्णैः यतिपातो भवति। कवेः मेहेरस्य 'स्तवार्चन-स्तवकम्' इति काव्यस्य 'दशावतार-स्तवः' इति कवितायां मन्दाक्रान्ता-च्छन्दसः प्रयोगो दृश्यते। तस्याः पद्यमेकं प्रस्तूयते

'धातुः स्तुत्या चिर-जलचरीं दिव्य-मूर्त्तिं दधानो

हत्वा शङ्खासुरमपहृताऽऽम्नायमम्भोधि-निम्ने।

यो वेदानामसि विहितवान् राक्षसारिः सुरक्षां

विश्वेश ! त्वां वर सुमनसां मीनमाद्यं नमामि ॥[3]

मन्दाक्रान्ता-च्छन्दसो लक्षणानुसारम् अत्र प्रतिपादं सप्तदशाक्षराणि सन्ति। तानि चतुष्पाद-युक्तानि। अस्मिन् छन्दसि क्रमानुसारं मगणः, भगणः, नगणः, तगणद्वयं, गुरुवर्णद्वयं च विद्यन्ते। कविना शास्त्र-नियमानुसारं सुप्रयुक्तमेव इदं छन्दः। चतुर्थपादे पादान्त-वर्णो (मि) विकल्पेन दीर्घः स्यात्। कवेः मेहेरस्य 'स्तवार्चन-स्तवकम्' इति स्तोत्रकाव्यस्य 'देवि ! दुर्गे ! नमस्ते' इति कवितायां मन्दाक्रान्ता-च्छन्दसः सम्यक् प्रयोगो विहितोऽस्ति। उदाहरणस्वरूपं तस्याः पद्यमेकं परिवेष्यते एवंप्रकारेण - **'माङ्गल्यानां त्वमसि जननी देवि ! दुर्गे ! नमस्ते**

दौर्बल्यानां सबल-हरणी भक्ति-माल्यै-र्वरेण्या।

त्वं शल्यानां समुपशमनी शैलजा शूलहस्ते !

वात्सल्यानां मधुर-झरणा देहि भद्रं शरण्या ॥[4]

शिखरिणी (सप्तदशाक्षरं वृत्तम्) - शिखरिणी-छन्दसो लक्षणमेवम्। **'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी॥**[5] शिखरिणी-नाम्नि अस्मिन् चतुष्पादे सप्तदशाक्षरे वृत्ते प्रतिपादं क्रमेण य-गणः, म-गणः, न-गणः, स-गणः, भ-गणः, एको लघुवर्णः, एको गुरुश्च भवन्ति। द्विधा विभक्ते छन्दसि षष्ठे वर्णे ततः सप्तदशे अर्थात् अन्त्यवर्णे यतिर्भवति। कवेः मेहेरस्य 'स्तवार्चन-स्तवकम्' इत्याख्यस्य स्तोत्रकाव्यस्य 'नमस्ते हे दुर्गे' इति कवितायाः दुर्गादेवी-स्तुति-परकं शिखरिणी-च्छन्दोबद्धं पद्यमेकम् उदाहरणस्वरूपं प्रस्तूयते :

'अनन्या गौरी त्वं हिमगिरि-सुकन्या सुमहिता

---

[1] वर्षा, श्लोकः-२७

[2] छन्दोमञ्जरी, २/२७३

[3] दशावतार-स्तवः,१

[4] नमस्ते हे दुर्गे,२

[5] छन्दोमञ्जरी,२/२६६; वृत्तरत्नाकरम,३/९०

पराम्बा हेरम्बाकलित-मुखबिम्बा मधुमती।

स्वभावैर्भव्या त्वं मुनि-मनुज-सेव्या जनहिता

ममान्तः-सन्तापं हृदयगत-पापं हर शिवे!॥[1]

शार्दूलविक्रीडितम् (ऊनविंशाक्षरं वृत्तम्) - शार्दूलविक्रीडित-च्छन्दसो लक्षणं वर्णितमित्थम्। **'सूर्याश्वै-र्मसजस्-ततः सगुरवः शार्दूलविक्रीडितम्॥**[2]पाठान्तरे लक्षणमेवम् - **सूर्याश्वै-र्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्॥**[3] शार्दूलविक्रीडितम् इत्याख्ये चतुष्पादे ऊनविंशाक्षरे वृत्ते प्रतिपादं क्रमेण म-स-ज-स-त-त-गणाः एको गुरुवर्णश्च भवन्ति। द्वादशे वर्णे, ततः सप्तमे वर्णे च यतिपातो भवति। अत्र १२+७=१९ वर्णाः सन्ति। उदाहरणार्थं कवेर्मेहेरस्य 'पुष्पाञ्जलिविचित्रा काव्यतः 'जाह्नवी'-कवितायाः शार्दूलविक्रीडित-च्छन्दोबद्धं पद्यमेकं परिवेष्यते एवम् :

'या स्वर्गात् समुपागता क्षितितले शम्भोर्जटा-संश्रिता

पुत्राणां सगरस्य मुक्ति-सरणी भागीरथी स्वर्णदी।

रम्या पुण्यजला महाकलुषहा मन्दाकिनी वन्दिता

माङ्गल्यं जगतां कृते वितनुते गङ्गा शुभाङ्गी सदा॥[4]

स्रग्धरा (एकविंशाक्षरं वृत्तम्) - लक्षणं स्रग्धरा-छन्दसो निरूपितमस्ति एवम् **'म्र-भ्नै-र्यानां त्रयेण त्रिमुनि-यतियुता स्रग्धरा कीर्त्तितेयम्।**[5] स्रग्धरा-नाम्नि अस्मिन् चतुष्पादे एकविंशाक्षरे वृत्ते प्रतिपादं क्रमेण म-र-भ-न-य-य-य-गणाः भवन्ति। अत्र सप्तम-वर्णे, ततः सप्तम-वर्णे, ततः पुनः सप्तमवर्णे च यतिर्भवति। अत्र समुदाय-रूपेण ७+७+७ = २१ वर्णाः भवन्ति। कवेः मेहेरस्य 'स्तवार्चन-स्तवकम्' इत्याख्यस्य स्तोत्रकाव्यस्य 'स्वस्ति-हस्ते नमस्ते' इति दुर्गादेवी-स्तुतितः पद्यमेकम् उदाहरणार्थमेवम् :

'सिंहासीना सुहासा विदलित-महिषा दिव्यभासा विभान्ती

मह्यं मोहादि-हन्त्री गणपति-जननी मोहिनी माननीया।

मन्दारै-र्मोदयन्ती रुचिर-हिमगिरे-र्नन्दिनी स्कन्दमाता

वन्द्या गीर्वाण-वृन्दै-र्हर हर-दयिते ! स्वान्त-सन्तापजातम्॥[6]

अस्मिन् पद्ये स्रग्धरायाः समुचित-पदयोजना छन्दोनियमानुसारं विद्यते।

---

[1] नमस्ते हे दुर्गे,२

[2] छन्दोमञ्जरी,२/३२२.वृत्तरत्नाकरम्,३/९९

[3] छन्दोमञ्जरी, २/१९. सिद्धान्तकौमुदी एवं छन्दोमीमांसा, पृ.३२६

[4] जाह्नवी, ४

[5] छन्दोमञ्जरी,२/३४३. वृत्तरत्नाकरम्,३/१०२

[6] स्वस्ति-हस्ते नमस्ते,३

सुन्दरी (अर्द्धसम-वृत्तम्) - सुन्दरी-नामकस्य छन्दसो लक्षणमित्थं निरूप्यते। **'अयुजो-र्यदि सौ जगौ युजो सभरा ल्गो यदि सुन्दरी तदा॥**[1] सुन्दरी-नाम्नि अस्मिन् चतुष्पादे अर्धसम-वृत्ते विषमयोः अर्थात् प्रथम-तृतीययोः पादयोः क्रमेण स-स-ज-गणाः एको गुरुवर्णश्च भवन्ति, समयोः अर्थात् द्वितीय-चतुर्थयोः पादयोः क्रमेण स-भ-र-गणाः एको लघुवर्णः एको गुरुवर्णश्च भवन्ति। प्रथम-पादे तृतीय-पादे च प्रत्येकं दश-वर्णाः, पुनः द्वितीय-चतुर्थयोः पादयोः प्रत्येकम् एकादश-वर्णाः विद्यन्ते। पादस्य अन्त्यवर्णे यतिपातो भवति। अस्य छन्दसः अपर-नामद्वयमपि कथ्यते 'वियोगिनी', 'वैतालीयं' चेति। उदाहरणस्वरूपम् कविवर-राधानाथराय-प्रणीतायाः 'वर्षा' इति मूल-ओड़िआ-कवितायाः कवेर्मेहेरस्य संस्कृतानुवादात् सुन्दरी-च्छन्दसा रचितं पद्यमेकं समुपस्थाप्यते इत्थम् :

'मनुजोऽनुज! काल-बन्धनै-
र्भ्रमतीत्थं बहुलार्त्ति-विह्वलः।
इह कामयते तथाप्यसौ
चरितार्थां भवभोग-तृष्णिकाम् ॥[2]

उपर्युक्त-विवेचनेन ज्ञायते यत् कविना मेहेरेण सुमञ्जुलरूपेण अनेकानि प्रचलितानि छन्दांसि स्वीय-कृतिषु प्रयुक्तानि। सम्प्रति कविना व्यवहृतानाम् उपजाति-च्छन्दसः कतिपय-भेदानां विवेचना क्रियते।

उपजाति: **(मिश्रितच्छन्दोरूपं वृत्तम्)** - उपजातिरिति छन्दसो लक्षणमेवं निरूपितम् :

'अनन्तरोदीरित-लक्ष्मभाजौ
पादौ यदीयावुपजातस्ता:।
इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ॥[3]

छन्दःशास्त्रोक्त-लक्षणानुसारम् इन्द्रवज्रा-उपेन्द्रवज्रयो: छन्दसो: परस्पर-मिश्रणेन उपजाति-नामकस्य छन्दस: सृष्टिः भवति। एषा साधारणतया उपजातिरिति कथ्यते। **इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥'** इति लक्षणाद् बुध्यते यत् अपरयोः कयोश्चित् द्वयोः छन्दसोः अथवा त्रयाणाम् अथवा चतुर्णां छन्दसां परस्पर-पाद-मिश्रणे सत्यपि उपजातिर्नाम एव छन्दो भवतीति छन्दोविद्भिः प्रतिपादितम्। एवंप्रकारेण उपजातयः विविध-प्रकाराः भवितुमर्हन्ति। कवेः हरेकृष्णमेहेरस्य संस्कृतरचनासु विविध-प्रकाराणि उपजाति-च्छन्दांसि दृष्टिगोचराणि भवन्ति। तेषु कतिपयच्छन्दसां सोदाहरणं विवेचनं निम्नरूपेण प्रस्तूयते।

इन्द्रवज्रायाः उपेन्द्रवज्रायाश्च मिश्रणेन उपजातिः - कवे: मेहेरस्य 'सौन्दर्यसन्दर्शनम्'-काव्यस्य 'सौन्दर्य-प्रकाश:' इति कवितायाम् उपजातिरिति छन्दस: प्रयोगो दृश्यते। उदाहरणस्वरूपम् :

---

[1] छन्दोमञ्जरी, ३/१३

[2] वर्षा-२६, लोकभाषासुश्री:

[3] छन्दोमञ्जरी,२/७६; वृत्तरत्नाकरम्, ३/३२

‘सत्यं शिवं सुन्दरमत्र लोके

प्रसिद्धमेतत् त्रितयं विभाति।

जानाति नित्यं खलु तत्त्वदर्शी

नाज्ञाय किञ्चित् स्वदते मनोज्ञम् ॥[1]

पद्येऽस्मिन् प्रथमे, तृतीये, चतुर्थे च पादे इन्द्रवज्रा प्रयुक्ताऽस्ति। केवलं द्वितीये पादे उपेन्द्रवज्रा विद्यते, अत्र विभाति-शब्दस्य ति-इति पादान्त्य-ह्रस्व-वर्णः विकल्पेन दीर्घो भवति नियमानुसारम्। अतः द्वयोः छन्दसोः मिश्रणादत्र उपजातिरिति सुस्पष्टं ज्ञायते।

इन्द्रवंशा-वंशस्थयोः छन्दसोः मिश्रणेन उपजातिः - पुनश्च ‘सौन्दर्य-संदर्शनम्’-काव्यस्य ‘सौन्दर्य-प्रकाशः’ इति कवितायाम् इन्द्रवंशायाः वंशस्थस्य च सम्मिश्रणेन उपजाति-च्छन्दस: प्रयोगो विलोक्यते। ततः पद्यमेकं प्रस्तूयते :

‘सन्ताप-नाशाय सुखोपलब्धये

स्वान्तः-प्रसादाय भुवां शिवाप्तये।

सुमङ्गलं वाङ्मय-सिन्धु-गर्भतः

काव्याख्य-रत्नं विबुधैः समुद्धृतम् ॥[2]

अत्र उदाहरणे प्रथम-द्वितीय-चतुर्थपादेषु इन्द्रवंशा व्यवहृतास्ति, केवलं तृतीय-पादे वंशस्थं विद्यते। इत्थम् अनयो: द्वयोः छन्दसोः सम्मिश्रणेन उपजाति-र्नाम छन्द: प्रयुक्तमिति सिद्धम्। कवेः ‘पुष्पाञ्जलिविचित्रा’-काव्यस्य ‘विभाति भावना’ इति कवितायां वंशस्थ-इन्द्रवंशयोः पाद-मिश्रणेन उपजातिरिति छन्दसो व्यवहारः कृतः। ततः उदाहरणस्वरूपं पद्यमेकं परिवेष्यते इत्थम् **‘न यत्र पर्यावरण-प्रदूषिका**

न वै वधू-प्राणहरा विभीषिका।

न यत्र हिंसा शठता प्रवञ्चना

दिव्या चिरं सैव चकास्ति भावना ॥[3]

अस्मिन् उदाहरणे प्रथम-द्वितीय-तृतीय-पादेषु वंशस्थं प्रयुक्तमस्ति, केवलं चतुर्थ-पादे इन्द्रवंशा विद्यते। अत: एतयोः पाद-सम्मिश्रणेन उपजाति-र्नाम छन्द: प्रयुक्तमिति सिद्धम्। कवेः ‘स्तवार्चनस्तवकम्’-काव्यस्य ‘श्रीदुर्गापञ्चकम्’ इति कवितायाम् इन्द्रवंशा-वंशस्थयो: मिश्रणेन उपजातिरिति छन्दसो व्यवहारः दृष्टिपथमायाति। उदाहरणस्वरूपं पद्यमेकं परिवेष्यते इत्थम् **अस्माकमन्तःकरण-प्रदूषणं**

भस्मीकुरु त्वं तमसां निरासिनी।

शर्वाणि ! सर्वाणि पवित्रय स्वयं

---

[1] सौन्दर्य-प्रकाश:,३

[2] सौन्दर्य-प्रकाशः, १

[3] विभाति भावना,९

प्रसार्य पर्यावरणं सुनिर्मलम्॥[1]

उपर्युक्ते पद्ये प्रथम-द्वितीय-तृतीय-पादेषु इन्द्रवंशा प्रयुक्तास्ति, केवलं चतुर्थ-पादे वंशस्थं व्यवहृतम्। एवं द्वयोः सम्मिश्रणेन उपजाति-र्नाम छन्दः प्रयुक्तमिति सिद्धम्।

इन्द्रवज्रा-वंशस्थयोः मिश्रणेन उपजातिः - कवेः 'पुष्पाञ्जलिविचित्रा'-काव्यस्य 'होलिकाभिनन्दनम्' इति कवितायां द्वयोः इन्द्रवज्रा-वंशस्थयोः छन्दसोः मिश्रणेन उपजाति-च्छन्दसः प्रयोगो दृश्यते। उदाहरणस्वरूपं सम्पृक्तं पद्यं प्रस्तूयते इत्थम्

सद्भावनायाः प्रिय-मित्रतायाः

प्रसार्य वार्त्तां सरसां सुसौरभाम्।

सुरङ्ग-हिल्लोलमयं हि मङ्गलं

तनोतु भव्यो भुवि होलिकोत्सवः॥[2]

अस्मिन् पद्ये प्रथम-पादे इन्द्रवज्रा व्यवहृता, द्वितीय-तृतीय-चतुर्थ-पादेषु वंशस्थं प्रयुक्तमस्ति। एवमुभयोः सम्मिश्रणेन उपजाति-र्नाम छन्दः सुनिश्चितम्।

उपेन्द्रवज्रायाः इन्द्रवंशायाश्च मिश्रणेन उपजातिः - कविवर-राधानाथराय-कृतायाः 'वर्षा' इति ओड़िआ-कवितायाः कवेः मेहेरस्य संस्कृत-श्लोकानुवादे उपेन्द्रवज्रायाः इन्द्रवंशायाश्च मिश्रणेन उपजाति-च्छन्दसः प्रयोगः संदृश्यते। उदाहरणस्वरूपं प्रस्तूयते सम्पृक्तं पद्यमेवंप्रकारकम् :

'धराधर-श्याम-शरीर-लग्ना

विभान्ति शुभ्राः क्वचिदभ्र-पुञ्जाः।

विष्णो-र्ध्रुवं विच्छुरिताः कलेवरे

क्षीरोद-फेनाः प्रतिभान्ति चेतसा॥[3]

उल्लिखिते पद्ये प्रथम-पादे द्वितीय-पादे च उपेन्द्रवज्रायाः प्रयोगोऽस्ति। ततः तृतीये चतुर्थे च पादे इन्द्रवंशा व्यवहृता। इत्थं द्वयोः सम्मिश्रणेन उपजाति-र्नाम छन्दः सिद्धम्।

उपेन्द्रवज्रा, इन्द्रवज्रा, इन्द्रवंशा चेति त्रयाणां छन्दसां मिश्रणेन उपजातिः - कवेः मेहेरस्य 'स्वस्तिकविताञ्जलिः'-काव्यस्य 'स्वास्थ्यभावनम्' इति कवितायाम् उपेन्द्रवज्रायाः इन्द्रवज्रायाः इन्द्रवंशायाश्च परस्पर-मिश्रणेन उपजातेः सन्निवेशो लोक्यते। उदाहरणस्वरूपं पद्यमेवंरूपम् :

'मितं सदाहार-विहार-जातं

ध्येयं समेषां सदने नितान्तम्।

प्रातश्च सायं चरण-प्रचालनं

---

[1] श्रीदुर्गापञ्चकम्,४

[2] होलिकाभिनन्दनम्,१

[3] वर्षा-६, लोकभाषासुश्रीः

सारं हितं स्वास्थ्यकृते निगद्यते॥[1]

प्रोक्ते पद्ये प्रथम-पादे उपेन्द्रवज्रा, द्वितीय-पादे इन्द्रवज्रा, तृतीय-चतुर्थ-पादयोः इन्द्रवंशा व्यवहृतास्ति। इत्थं त्रयाणां छन्दसां पादाः प्रयुक्ताः सन्ति। एवं मिश्रणेन उपजातिरिति छन्दसः प्रयोगो निश्चीयते।

इन्द्रवंशा, वंशस्थम्, इन्द्रवज्रा, उपेन्द्रवज्रा चेति चतुर्णां छन्दसां मिश्रणेन उपजातिः - कवेः 'पुष्पाञ्जलिविचित्रा'-काव्यस्य 'जाह्नवी' इति कवितायां चतुर्णां छन्दसां सम्मिश्रणेन उपजातिरिति छन्दसो व्यवहारः कृतः। तस्मात् उदाहरणस्वरूपं पद्यमेकं परिवेष्यते इत्थम् :

'या विश्ववारा प्रथमैव संस्कृति-
र्विराजते या पुनती जगज्जनम्।
सा जाह्नवी-चिह्नित-पुण्यधारा
तनोतु भद्रं रस-भाव-सारा॥[2]

उदाहरणेऽस्मिन् प्रथम-पादे इन्द्रवंशा, द्वितीय-पादे वंशस्थम्, तृतीय-पादे इन्द्रवज्रा, चतुर्थ-पादे उपेन्द्रवज्रा, एवं चतुर्णां छन्दसां पादाः प्रयुक्ताः सन्ति। एतेषां परस्पर-सम्मिश्रणेन उपजाति-र्नाम छन्द: व्यवहृतमिति निश्चितम्।

उपसंहारः - उपर्युक्तरूपेण विविधानां छन्दसां कतिपय-वर्णवृत्तानां वा अनुशीलनेन ज्ञायते यत् कवेः हरेकृष्ण-मेहेरस्य लेखनी काव्य-विरचने न केवलं गतिशीलतां भजते, अपितु परम्परा-प्रचलितानां नानाच्छन्दसां समीचीन-प्रयोगकरणे निपुणत्वं प्रकाशयति। भावानुकूला भाषा कवेः रचना-वैशारद्यं सूचयति। पुनः विविध-च्छन्दसां पादमिश्रणेन उपजाति-च्छन्दोविरचनायामपि कवेश्चातुर्यं सम्यक् प्रकटितम्। कवेः कृतिषु छन्दोरचनायां कुत्रापि व्यतिक्रमोऽथवा नियम-लङ्घनादि-दोषो न दृश्यते। कविना कुत्रचिदपि अपशब्दानां प्रयोगो नैव कृत:। सर्वत्र सम्मार्जिता सुरुचि-सम्पन्ना पदावली व्यवहृता। जटिलता तथा दुर्बोधता कवे: कृतिषु न सन्दृश्यते। कुत्रापि रचनायाम् अनौचित्य-प्रयोगो न लभ्यते अथवा अश्लीलत्वादि-दोषो नास्ति। अत: कवेः मेहेरस्य विविध-काव्येषु समुपयुक्त-पदन्यास-कारणात् तथा शब्दानुकूलानां समुपयुक्त-भावानां प्रकाशन-कारणात् काव्यदोषादिकं न लक्ष्यते। काव्यगुण-सम्पन्ना तस्य कवितावली। पदावलीष्वपि कुत्रापि असाधु-प्रयोगो नैव विलोक्यते। तेन विरचितासु सर्वासु कवितासु तस्य अभिव्यक्ति: पूर्णरूपेण सरला, तरला, सुबोधा, रोचका च वर्त्तते। अनेन कवेः हरेकृष्णमेहेरस्य सर्जन-प्रवणतायाः प्रगतिशीलतायाश्च प्रमाणं नूनं समुपलभ्यते। वास्तवदृष्ट्या कवेः प्रतिभा सारस्वत-जगति नितान्तमभिनन्दनीया।

सहायक-ग्रन्थादि-सूची :

1. मेहेरः, हरेकृष्णः,(१९९७), *मातृगीतिकाञ्जलिः*, कलाहाण्डि-लेखक-कला परिषद्, भवानीपाटना, ओड़िशा.
2. मेहेरः, हरेकृष्णः, *पुष्पाञ्जलिविचित्रा, सौन्दर्यसन्दर्शनम्, स्वस्तिकविताञ्जलिः, स्तवार्चनस्तवकम्, सूक्ति-कस्तूरिका* (जालस्थानम् : www.hkmeher.blogspot.com)

[1] स्वास्थ्यभावनम्, ८

[2] जाह्नवी,२

3. मेहेरः, स्वभावकवि-गङ्गाधरः, (२०१२), *तपस्विनीमहाकाव्यम्,* (अनुवादकः, मेहेरः, हरेकृष्ण), परिमल पब्लिकेशन, शक्तिनगर, दिल्ली.
4. उपाध्याय, आचार्य बलदेव, (१९६६),*वैदिक साहित्य और संस्कृति,* शारदा निकेतन, वाराणसी.
5. उपाध्याय, आचार्य बलदेव, (१९९०),*संस्कृत साहित्य का इतिहास,* शारदा निकेतन, वाराणसी.
6. उपाध्याय, आचार्य बलदेव (२००२), (प्रधान सम्पा.)), *संस्कृत साहित्य का बृहद् इतिहास (सप्तम- खण्ड* आधुनिक संस्कृत साहित्य का इतिहास, (सम्पा.जगन्नाथ पाठक), उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ.
7. पण्डा, रवीन्द्रकुमारः, (२००९), *एसे अफ़ मर्डन् संस्कृत् पोएट्री,* भारतीय कला प्रकाशन, दिल्ली.
8. कालिदासः, (संवत् १९८५), *श्रुतबोधः,* श्रीहरिकृष्ण-निबन्धभवनम्, बनारस सिटी.
9. श्रीगङ्गादासः, (१९६९), *छन्दोमञ्जरी,* संपा. पं.अनन्तरामशास्त्री,चौखम्बा संस्कृत सीरिज् आफिस्, वाराणसी.
10. श्रीगङ्गादासः, (२०१५), *छन्दोमञ्जरी,* संपा. सुशान्तकुमार-राजः, सांविदीप्रकाशनम्, पुरी, ओड़िशा.
11. पति, निरञ्जन, पति, मिनतिराणी, (२०१३), *सिद्धान्तकौमुदी एवं छन्दोमीमांसा,* कल्याणी पब्लिशर्स, नवदिल्ली.
12. भट्टः, केदारः, (१९९९), *वृत्तरत्नाकरम्,* मेहरचन्द्र लक्ष्मणदास, हिन्दी संस्कृत-पुस्तक विक्रेता, सैदमिट्टा बाजार, लाहौर.
13. शुक्लः, हीरालाल (सम्पा), (२००२), *ए हिस्ट्री अफ़ मडर्न् संस्कृत लिट्रेचर्,* निउ भारतीय बुक् कर्पोरेशन्, दिल्ली.
14. Contributions of Harekrishna Meher to Sanskrit: Link: http://tapasvini-kavya.blogspot.in/2013/04contributions-of-drharekrishna-meher-to.html
15. श्रद्धा (संस्कृत-शोधपत्रिका, ISSN: 2321-273X), संयुक्ताङ्कः ३-४, २०१२-२०१३, स्नातकोत्तर-संस्कृतविभागः, गङ्गाधरमेहेर-स्वयंशासित-महाविद्यालयः, सम्बलपुरम्, ओडिशा.
16. बर्त्तिका (त्रैमासिकी, दशहरा-विशेषाङ्क, अक्टोबर-दिसम्बर,२०२२), (दुर्गादेवी-दशकम्), दशरथपुर, याजपुर, ओड़िशा.
17. लोकभाषासुश्रीः (मासिकी, अक्टोबर-नवम्बर २००६), (वर्षा-कविता), लोकभाषाप्रचार-समितिः, पुरी.
18. मेहेरः, हरेकृष्णः, (२०१७), *आधुनिक संस्कृतसाहित्य में काव्यदिशा,* एक आकलन, प्राचीप्रज्ञा ११-१२.
19. काव्यामृतवर्षिणी, (षाण्मासिकी, जनवरी-जून् २०२०), ('जयतु भारत-सैनिकवाहिनी' कविता), अमृतवाणी-कविपरिषद्, बागपतम्, उत्तरप्रदेशः.

Author's Detail

Address: डॉ. सस्मिता साहुः,
अध्यापिका, संस्कृत-विभागः,
पञ्चायत-महाविद्यालयः, बरगडम्, ओड़िशा.

****

SUBMIT YOUR MANUSCRIPT

Call for Research Papers for 19th Issue of peer reviewed Research Journal

"प्राची प्रज्ञा" (ISSN 2348 – 8417)

महोदयाः !

"प्राची प्रज्ञा" (ISSN 2348 – 8417) इति सन्दर्भितान्ताराष्ट्रियान्तर्जालपत्रिकायाः "शास्त्रमञ्जूषा" इति षाण्मासिकखण्डस्य **अष्टादशावतरणस्य (2024-दिसम्बर-मासे प्रकाशयिष्यमाणस्य)** कृते अधस्तनविषयमवलम्ब्य मौलिकाः शोधलेखा आविश्वं विद्यमानेभ्यो विद्वद्भ्य आमन्त्र्यन्ते । A4 पृष्ठे 1.15 पङ्क्तिगतान्तरालसहिता न्यूनातिन्यूनं दशपृष्ठात्मका लेखा निम्नप्रारूपेणैव टङ्कयित्वा prachiprajnaenb@gmail.com इति अन्तर्जालसंकेतेन मृदुप्रतिकृतिरूपेणैव **31st August, 2024 (12:00 Midnight IST)** पर्यन्तं प्रेषयितुं शक्यन्ते।

शोधपत्रस्य प्रारूपम् -

- शोधलेखाः संस्कृतभाषया/ Englishभाषया / हिन्दीभाषया वा 12/ 14 अक्षरमानेन A4 पृष्ठे 1.15 पङ्क्ति-अन्तरालेन समर्थ्यप्रान्तीयस्थापनपूर्वकं (Justified aligned) Microsoft Word आधारितसञ्चिकाप्रारूपमेवाश्रित्य टङ्किताः स्युः। संस्कृतभाषया हिन्दीभाषया च लेखाः Arial Unicode MS इति Unicode आधारितदेवनागरीलिप्या / रोमनलिप्या वा टङ्किताः स्युः।
- पादटिप्पणी / सन्दर्भसूची American Psychological Association (APA7) पद्धतिमनुसृत्य निर्मातव्या।
- पृष्ठसज्जाक्रमो अधोनिर्दिष्टरूपेण स्यात्
  1. शीर्षकपृष्ठम्
  2. शोधसारः - आंग्लभाषया 100 शब्दैः
  3. कुञ्चीशब्दाः -
  4. मूलपाठः पादटिप्पणीसहितः
  5. सन्दर्भः - APA7 अनुरूपः
  6. अनुक्रमणिका
  7. चित्राणि
  8. परिशिष्टानि
- शीर्षकपृष्ठम् अधोनिर्दिष्टप्रकारेण स्यात्
  1. शोधपत्रशीर्षकं – आंग्लरूपान्तरसहितं स्यात्
  2. निबन्धकारस्य नाम आंग्ल-देवनागरीलिपिभ्यां
  3. निबन्धकारस्य संस्थासम्बद्धता
  4. निबन्धकारस्य पत्राचारसंकेतः
  5. अणुपत्रसंकेतः
  6. दूरभाषसंख्या
- शोधपत्रेण सह स्वीयमेकम् सद्यः गृहीतं 3.5 x 4.5 cm परिमितं स्वीयं भावचित्रं 20 kb परिमितं (JPEG प्रारूपेण) अवश्यं प्रेषणीयम्।

▪शोधपत्रेण सह घोषणापत्रस्य पूरितप्रारूपस्य अङ्कीयप्रतिमा (scanned copy of the filled in declaration form) अवश्यं प्रेषणीया।

▪विशेषज्ञमण्डल्या पुनरीक्षणोपरान्तं (Peer Reviewing) प्रकाशनयोग्याः शोधलेखाः प्रकाशयिष्यन्ते।

प्रकाशनयोग्यतायाः मानदण्डाः निम्नवत् निर्धारिताः सन्ति-

1. शोधलेखः संस्कृतवाङ्मयस्य केनाप्येकेनाङ्गेन सह सम्बद्धः स्यात्। यथा- वेदः, वेदाङ्गानि, उपनिषद्, दर्शनानि, पुराणानि, स्मृतिः, योगः, आगमः, साहित्यं, कव्यशास्त्रं, व्याकरणं, तन्त्रं, ज्योतिषं तथा संगणकीयभाषाविज्ञान-पर्यावरणाद्याधुनिकविषयाः।
2. शोधलेखः स्वीयः मौलिकश्च स्यात्।
3. शोधलेखे विवेचनप्रक्रिया समस्याचयनत → आरभ्य क्रमेण प्राक्कल्पना → ततः समालोचनात्मकं मूल्याङ्कनं → तथा अन्ते शोधस्य मौलिकनिष्कर्षेण सहोपसंहारः इत्येवं क्रमवद्धतापुरःसरं विकसिता स्यात्।
4. शोधलेखे काचिन्नवीना अवधारणा, किमपि नवीनं तथ्यं, नवीनं मूल्याङ्कनं, नवीनः सिद्धान्तः, नवीना शैली, नवीनः संकेतो वा अवश्यमाविष्कृतः स्यात्।
5. शोधलेखस्य भाषा परिष्कृता, प्राञ्जला, स्तरानुगुणा च स्यात्।
6. शोधलेखे समसामयिकी सम्बद्धता, तार्किकम् अनुशीलनं, तथा सन्दर्भाणामौचित्यमवश्यं स्युः।
7. शोधलेखे अन्यस्य प्रकाशनस्यांशोद्धरणे तदनुमतिः अवश्यं स्वीकर्तव्या, यदि तादृशमुद्धरणं ५०० शब्देभ्योऽधिकमस्ति।
8. प्रकाशनात्परं शोधलेखस्य सर्वाधिकारः "प्राची प्रज्ञा" इत्यस्याः एव सुरक्षितः भविष्यति।
9. प्रकाशनसम्बन्धे पत्राचाराय शोधलेखेन सह प्रयुक्तान्तर्जालसंकेतः (Email ID) एव उपयोक्तव्यः।
10. सर्वाऽपि प्रक्रिया अन्तर्जालमाध्यमेनैव सम्पादयिष्यते। मुद्रितरूपेण न काचित् प्रक्रिया अवलम्ब्यते।
11. शोधलेखस्य प्रकाशनयोग्यताऽयोग्यतानिर्धारणदायित्वं "प्राची प्रज्ञा" इत्यस्यामेव न्यस्तं भविष्यति।

शोधपत्रेण सह प्रेषणीयानां सूची

1. **उपर्युक्तप्रारूपानुरूपः मौलिकः शोधलेखः**
2. **सद्यो गृहीतं 3.5 x 4.5 cm परिमितं स्वीयं 20 kb परिमितं (JPEG प्रारूपेण) भावचित्रम्।**
3. **प्रदत्तप्रारूपेण घोषणापत्रम्**

Call for Research Papers for 19th Issue of peer reviewed Research Journal "प्राची प्रज्ञा" (ISSN 2348 – 8417)

Respected Scholars !

Research Papers on following topics in Sanskrit/ English/ Hindi are invited from the scholars of the entire globe for the **19th Issue (to be published in December, 2024)** of peer reviewed refereed, International Research Journal "प्राची प्रज्ञा" having ISSN no. 2348 – 8417, for its half yearly section "शास्त्रमञ्जूषा". **The Last date of receipt of articles is 12:00 Midnight (IST) of 31st August, 2024**. A submission to "प्राची प्रज्ञा" must be an original work. The paper in not less than 10 pages, should be emailed to prachiprajnaenb@gmail.com in e-copy only. A submission must fulfil the following criterion"

1. Format of the Research Paper:
   - All the fonts of Devanagari / Roman and Roman with diacritical marks, must be Unicode compatible. For Devanagari, Arial Unicode MS and for Roman, Times New Roman is preferable. The size of fonts should be 12 in case of English and 14 in case of Sanskrit / Hindi.
   - Format of file must be Microsoft Word only. File Formats in Adobe Page Maker / pdf / Corel Draw / Adobe Indesign etc. are not acceptable.
   - Page size must be of A4 typed on 1.15 line spacing and justified aligned and 1" margined format.
   - Footnotes / References should be embedded in the text in a consistent style and order, as per American Psychological Association, 7th Edition (APA7) style:
   - Arrangement of the pages of the paper should be made in the following format / order:
   - Title page
   - Abstract – in English & about 100 words
   - Key Words
   - Text
   - References - (APA7) style
   - Footnotes
   - Tables
   - Figures
   - Appendices

2. The Title page setup should be made in the following format / order:
   - Paper title – Must be with English counterpart
   - Author name in both English and Devanagari fonts
   - Author's affiliation
   - Address to contact
   - Email id
   - Mobile Number
   - A passport size photograph in JPEG format only of 3.5 x 4.5 cm, up to 20 kb, must be attached along with the Research Paper.
   - Each Research paper should be accompanied with a scanned copy of the filled in declaration form available in our site.

All the research papers undergo a review process. The papers (without the name of the contributor) are sent to the reviewers having expertise on the field, and considered for publication only on the recommendations of the reviewers on following parameters:

1. The Research Paper must have a link to any branch of Sanskrit Studies, i.e. Vedas, Vedāṅgas, Upaniṣads, Philosophies, Purāṇas, Smṛtis, Literature, Poetics, Grammar, Tantras, Astrology,

Astronomy and Modern subjects like Computational Linguistics, Environmental Science and allied fields.

2. The Research Paper must be an original contribution of the author.
3. The discussion should develop in the order from Statement of Problem to→ assumption or hypotheses to → critical evaluations → to a conclusion with the findings of research.
4. The Research Paper must present a discovery / invention of a new - idea / thought /design / plan / awareness / inkling/ indication / appreciation / conception / understanding / opinion / view/ concept / notion / theory / principle or even a new style of interpretation.
5. The language must be lucid and must meet the standard of presentation.
6. The Research Paper must have contemporary relevance, contributions to knowledge, clarity and logic in analysis, methodology and appropriateness of references.
7. f the author has quoted more than 500 words / a table / a figure from a published work, in the article, a copy of permission obtained from the respective copyright holder needs to be enclosed.
8. The copyright is transferred to the Journal if article is accepted for publication in "प्राची प्रज्ञा"/ Prachi Prajna, ISSN 2348 – 8417.
9. All the correspondence should be made through the same email ID only by which the paper has been submitted.
10. All the process will be made online only and no printing media will be undertaken.
11. The selection of the Research paper is entirely entrusted to "प्राची प्रज्ञा".

If the paper meets the preliminary requirements, the article will be processed for review, which could take up to 3 months. The accepted articles are scheduled for publication in the alphabetical order.

Check list of the enclosures along with the Research Paper:

1. **Original Research Paper in the prescribed format mentioned above.**
2. **A passport size photograph in JPEG format only of 3.5 x 4.5 cm up to 20 kb.**
3. **A Declaration by Author in the prescribed format**

(Editors, Śāstramañjūṣā)

"प्राची प्रज्ञा"

प्राची प्रज्ञा
E-Journal in Sanskrit

“प्राची प्रज्ञा”

(ISSN 2348 – 8417)

A Peer Reviewed Refereed E-Journal in Sanskrit
INDEXED IN DOAJ, ROAD , FATCAT , JDB & SUDOC

https://sites.google.com/site/praachiprajnaa
The śāstramañjūṣā

18h Issue / Vol. X – June, 2024